BNo1

5

॥श्रीमद्गीताभाष्यं॥श्री॥

1/5

Srimadgitabhashyam.

2061

॥श्रीबादरायणकृष्णायनमः॥श्रीमदानंदतीर्थभगवत्पादाचार्यगुरुभ्यो
नमोनमः॥देवंनारायणंनत्वा सर्वदोषविवर्जितं॥परिपूर्णंगुरूंश्चा
न्गीतार्थंवक्ष्यामिलेशतः॥१॥नष्टधर्मज्ञानलोकेकृपालुर्ब्रह्मर
द्रेंद्रादिभिरर्थितोज्ञानप्रदर्शनायभगवान्व्यासोऽवततार॥तत
श्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनाद्वेदार्थाज्ञानाच्चसंसारे
क्लिश्यमानानांवेदानधिकारिणांस्त्रीशूद्रादीनांचधर्मज्ञानद्वारा
मोक्षोभवेदितिकृपालुःसर्ववेदार्थोपबृंहितांतदनुक्तकेवलेश्व
रतत्त्वज्ञानदृष्टार्थयुक्तांचसर्वप्राणिनामवगाह्यानवगाह्यरूपांके
वलभगवत्स्वरूपपरांपरोक्षार्थांमहाभारतसंहितामचीकॢपत्॥ ॥श्रीराम
तत्रूथ्यांचोक्तं॥लोकेशाःब्रह्मरुद्राद्याःसंसारेक्लेशिनंजनं॥वेदाथांजे

मधीकारवर्जितं चस्त्रियादिकं ॥ आवेदस्य प्रार्थयामासुः देवेशं पु
रुषोत्तमं ॥ ततः प्रसन्नो भगवान् व्यासोऽभूत्ताचतेनच ॥ अन्याव
तारस्रूपेष्व वेदानुक्तार्थमर्पितं ॥ केवलेनात्मबोधेन दृष्टवेदार्थ
संयुतं ॥ वेदादप्यपरं चक्रे पंचमं वेदमुत्तमं ॥ भारतं पंचरात्रं च मू
लरामायणं तथा ॥ पुराणं भागवतं चेति संभिन्नः शास्त्रपुंगवः
इति नारायणाष्टाक्षरकल्पे ॥ ब्रह्मापितन्नजानाति ईषसर्वोपिजा
नते ॥ तदर्थमृषयस्तत्तु भारतं प्रवदंतिहीरूपनारदीये ॥ ब्रह्माद्यैः
प्रार्थितो विष्णुर्भारतं स चकार ह ॥ यस्मिन्दशार्थाः सर्वत्रनज्ञेयाः
सर्वजंतुभिरिति नारदीये ॥ भारतं चाप्यकृतवान्पंचवेदमनुत्त मं
मं ॥ दशानराथीः सर्वत्र केवलं विष्णुबोधके ॥ परोक्षार्थं तु सर्वत्रैव

॥२॥ दादृष्युत्तमं तु यदिति स्कांदे ॥ यदि विद्याच्चतुर्वेदान्सांगोपनिषदान्द्वि-
जः ॥ न चेत्पुराणं संविद्यान्नैव स स्याद्विचक्षणः ॥ इतिहासपुराणाभ्यां
वेदं समुपबृंहयेत् ॥ बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति ॥ म-
न्वादि केचिद्ब्रुवते ह्यास्तिकादि तथापरे ॥ तथोपरिचराद्यन्ये भार-
तं परिचक्षते ॥ महत्वाद्भारवत्वाच्च महाभारतमुच्यते ॥ निरुक्त-
मस्य यो वेद सर्वपापैः प्रमुच्यते ॥ यदिहास्ति तदन्यत्र यन्नेहास्ति
न तत्क्वचित् ॥ विराटोद्योगसारं भारतमित्यादि तद्वाक्यपर्यालोच-
नया ऋषिसंप्रदायात् ॥ को ह्यन्यः पुंडरीकाक्षान्महाभारतकृ-
द्भवेदित्यादि पुराणग्रंथांतरगतवाक्यान्यथानुपपत्त्या नारदाध्य-
यनादि लिंगैश्चावसीयते ॥ कथमन्यथा भारतनिरुक्तिज्ञानमात्रे ॥श्रीराम॥

पेस्यशोकः॥न तावज्जीवनाशं नित्यत्वादित्याह। न त्वेवेति। नापिदे
हनाशमित्याह॥देहिन इति॥यथा कौमारादिदेहनाशेन जरादि
प्राप्तावशोकः। एवं जीर्णादिदेहहानेन देहांतरप्राप्तावपि। तथा
पि तद्दर्शनादिभोगादिना शोक इति चेन्नेत्याह॥मात्रास्पर्शा इति
मीयंत इति मात्राः विषयाः। तेषां स्पर्शाः संबंधाः। ते एव शीतो
ष्णसुखदुःखदाः। देहे शीतोष्णादिसंबंधाद्धि शीतोष्णाद्यनु
भवः आत्मनः। ततश्च सुखे। न ह्यात्मनः स्वतो दुःखादिसंभव
ति। कुतः। आगमापायित्वात्॥यद्यात्मनः स्वतः स्युः सुप्तावपि
स्युः। अतो यतो मात्रास्पर्शाः जाग्रदादावेव वर्तंते संति नान्यदेति त
दन्वयव्यतिरेकात्तन्निमित्ता एव नात्मनः स्वतः स्युः॥अतश्च

यी॥अप्रयोजकत्वात्॥मास्तु धर्मो निरूप्यत्वादिति चेन्न॥सर्वाभिम
तस्य प्रमाणं विनानिषेद्धुमशक्यत्वात्॥न च सिद्धिरप्रमाणकः
स्यादिति चेन्न।सर्वाभिमतत्वेरेव प्रमाणत्वात्॥अन्यथा सर्ववाचिक
व्यवहारासिद्धेश्च॥न च मयाश्रुतमिति न वक्तुं शक्यं॥अन्य
थायाप्रस्फतेरे स्यात्॥भ्रांतिवीतत्व स्यात्॥सर्वदुःखकारणत्वे
वा स्यात्॥एकोवान्यथा स्यात्॥रचितत्वे च धर्मप्रमाणस्य कर्तु
रज्ञानास्यादिदोषाशंकास्यात्।न चाद्दोषत्वस्य वाक्येनैव सिध्ये
ति।न च येन केन चिदपौरुषेयमिमिस्फकमुक्तवाक्यसमं स्या
त्॥अनादिकालपरिग्रहसिद्धत्वात्॥अतः प्रामाण्यं श्रुतेः॥अ
तः श्रुतर्कैर्धरिस्तत्र न मुह्यति॥अथ वा जीवनाशं देहनाशं वा॥

फलस्यादर्शनात्

त्वमेतेजनाधिपाश्चनित्याः। देहिनोभावेऽप्यतद्भवति॥ तदेवासिद्धं।
मितिचेन्न॥ देहिनोऽस्मिन्यथाकौमारादिशरीरभेदेऽपिदेहीनदोस्ति
त्वासिद्धेः॥ एवंदेहांतरप्राप्तावपिद्रष्टित्वात्॥ नहिजडस्यशरीर
स्यकौमाराद्यनुभवः संभवति। मृतस्यवाय्वाद्युपगमाद्यनुभवा
भावः॥ अहंमनुष्यइत्यनुभवाच्चैतत्सिद्धमितिचेन्न॥ सत्यंवावि
शेषेदेहस्फुरणादौज्ञानादिविशेषादर्शनात्॥ समश्चाभिमानोमन
सिकाष्ठादिवच्च॥ श्रुतेश्च॥ प्रामाण्यप्रत्यक्षादिवत्॥ नचवोभ्रा
दिवाक्यवत्॥ अपौरुषेयत्वात्॥ नह्यपौरुषेयेपौरुषेयाज्ञानादि
षः कल्प्ययितुंशक्याः॥ विनाचकस्यचिद्वाक्यस्यापौरुषेयत्वेस
र्वसमयाभिमतधर्माद्यसिद्धिः॥ यस्त्वेतन्नांगीकुरुतेनासौसम
श्च

णसर्वपापक्षयः॥प्रसिद्धश्चासोर्थः॥कथंचान्यस्य न कर्तुं शक्यते॥ग्रंथांत
रगतत्वाच्च॥नाविद्यमानस्मृतिः॥न च कर्तुरेव॥इतरत्रापि साम्यात्॥
तत्र च सर्वभारतार्थसंग्रहां वासुदेवार्जुनसंवादरूपां भारतपारि
जातमधुभूतां गीतामुपनिबबंध॥तच्चोक्तं भारतं सर्वशास्त्रेषु भा
रते गीतिका वरा॥विष्णोः सहस्रनामापि ज्ञेयं पाठ्यं च तद्द्वयमिति
महाकौर्मे॥स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदनमिति च॥तत्र
सेनयोर्मध्ये बांधवादिमोहजालसंवृतं विषीदंतमर्जुनं भगवा
नुवाच॥प्रज्ञावादान्॥स्वमनीषाप्रवचनानि॥कथमशोच्याः॥न
गतासून्।किमिति।न त्वेवाहं।ईश्वरानित्यत्वस्याप्रस्तुतत्वाद्दृ
ष्टांतत्वेनाह॥न त्वेवेति।यथाहुर्निसः सर्ववेदांतेषु प्रसिद्धेः।एवं

स्यापि नृस्यचिन्नित्यतमितिनेत्याह। अंतवंतइति। अस्तु तर्हि दर्पणनाशात्प्रतिबिंबनाशवदात्मनाश
 इत्याह। नित्यस्येति। शरीरिणइतिरीश्वरव्यावृत्तये। नचनैमित्तिकनाशइत्याह। अविनाशिनइति॥
अप्रमेयेश्वरस्वरूपत्वात्॥ नहि उपाधि बिंबसान्निध्ये नाशे प्रतिबिंबनाशः। सतिच प्रदर्शकेस्वयमे
वात्र प्रदर्शकेः चित्वात्। नित्यश्चोपाधिः कश्चिदस्ति। प्रतीतौ विमोक्षस्य। नित्योपाध्यास्वरूपया॥
चिद्रूपयाततोजीवः केशवप्रतिबिंबइति। भगवद्वचनात्। व्यवहारस्तुभ्रांतइत्याह। यएनमिति।
कुतः उक्तहेतुभ्यो नायं हंतिनहन्यते। नहि प्रतिबिंबस्य क्रियास हि बिंबक्रिययैव क्रियावान्। ध्या
यतीवेतिश्रुतेश्च। अत्र मंत्रवर्णोप्यस्तीत्याह। नजायतइति। नचेश्वरस्तानवद्भूत्वाभविता। त
द्धि न देशतः। देशतोकालतोयोसावदवस्थायास्यतोन्यतः। अविलुप्तावबोधात्मेत्यादिश्रुति
स्मृतिसिद्धं। अजादिलक्षणेश्वरसरूपत्वात्। शाश्वतः सदैकरूपः। पुरं देहंमणतीति पुराणः। न
थापि न हन्यते हन्यमाने पि देहे। अतोयएवं वेद स कथं कंघातयतिहंतिवा। अविनाशिनं। नैमि
त्तिकनाशरहितं। नित्यं स्वाभाविकनाशरहितं। अथवा अविनाशिनंदोषयोगरहितं। नित्यंसदा

ते विषयविषयीभावसंबंधादन्यः संबंधो नास्ति। न चागमापायित्वेपि प्रवाहरूपेणापि नित्यत्व
मस्ति। सुप्तिप्रलयादावभावादित्याह। अनित्या इति। अतः आत्मनो देहाद्यात्मभ्रम एव सुखदुः
खकारणं। अतस्तद्धि मुमुक्षुस्वबंधुमरणादिदुःखं न भवति। अतोभिमानं परित्यज्य तान् शीतोष्णा
दीन् तितिक्षस्व। अत्र प्रयोजनमाह। यंहीति। यमेते मात्रास्पर्शा न व्यथयंति। पुरीशयमेव संतं शरी
रसंबंधाभावेपि स्वविषामपि व्यथाभावात्। पुरुषमिति विशेषणं। कथं न व्यथयंति। समदुःखसु
खत्वात्। तत्कथं धैर्येण नित्यआत्मेत्युक्ते। किमात्मैव नित्यः अहोस्विदन्यदपि अन्यदपि तत्किमित्या
ह॥ नासत इति। असतः कारणस्य सतो ब्रह्मणश्चाभावो न विद्यते। प्रकृतिः पुरुषश्चैव नित्यौ का
लश्च सत्तमेति वचनात्। श्रीविष्णुपुराणे। पृथग्विद्यत इत्यर्थः। असतः कारणत्वं च सदसद्रू
पयाश्चासौ गुणमय्या गुणो विभुरिति च भागवते। असतः सदजायतेति च। अव्यक्तेभ्य। संप्रदायत
श्चैतत्सिद्धमित्याह। उभयोरपीति। अंतो निर्णयः। किं बहुना यद्देशतो नंतं। तत्सिद्धमेव वेदाद्यम
दपीत्याह। अविनाशीति। नापि शापादिना विनाशइत्याह॥ विनाशमिति। अव्ययं तत्। भवतु देह

६ मोक्षोहिमहापुरुषार्थः।तत्रापिमोक्षएवार्थः।अंतेपुरेमिरेधीरानंतेमध्येपुरेमिरे।अंतत्रात्विंसु
खंत्राहुः।दुखमंतरमेतयोः।पुण्यजितांलोकःक्षीयंतइत्यादिश्रुतिस्मृतिभ्यः।सचविष्णुप्रसा
दादेवसिध्यति।वासुदेवमनाराध्यकोमोक्षंगंतुमिच्छति।तुष्टेतुतत्रकिमलभ्यमनंतइशे।तत्प्रसा
दादवाप्नोतिपरांसिद्धिंनसंशयः।येषांसएवभगवान्दययेत्अनंतःसर्वात्मनाश्रितपदोय
दिनिर्व्यलीकं।तेवैविदंत्यतितरंतिचदेवमायां।नैषांममाहमितिधीःश्वसृगालभक्ष्ये।तस्मि
न्प्रसन्नेकिमिहास्त्यलभ्यंधर्मार्थकामैरलमल्पकास्ते।कृतेयदस्मिन्भवरुजीवास्ताप
त्रयेणोपहतानशर्म।आत्मन्नलभंते।कृतेभवत्प्रसादात्किंस्यमोक्षोपिवेदिह।तमेवंविदानि
त्यादिश्रुतिस्मृतिभ्यःसर्वोपिहिज्ञानादेवभवति।लोकप्रसिद्धेः।लोकप्रसिद्धमविरुद्धम
त्रार्थंगीकार्यं।अहल्याजारत्वाद्यपिद्वापकृतोपितेनबहुतरापिलेपआसीदित्युक्तेषमेव
वक्ति।बहुनरकफलोत्घसो।।तस्यचनलोमचक्षीयतइतिश्रुतेर्नराच्च।योमामेवमसं
मूढोजानातिपुरुषोत्तममितितदुक्तेश्च।।सत्यंसत्यंपुनःसत्यंशपथैश्चापिकोटिभिः।।

भाविनमिति। सर्वत्र विवेकः। दोषयुक्तपुरुषादिषु नष्टशब्दप्रयोगदर्शनात्। देहात्मविवेकानुभवा
र्थं दृष्टान्तमाह॥ वासांसीति। स्वतो प्रयोजनिमित्तेभ्यो विनाशिनोक्तेन चिन्निमित्त विशेषणं स्यात्॥
कृच्छेदवतश्चस्य तो विशेषनिमित्तानि निषेधति। नैनमिति। वर्तमाननिषेधात्स्यादुत्तरत्रेत्यत आह॥
अच्छेद्य इति। वर्तमानादर्शनायुक्तमयोग्यत्वमिति सूचयति। वर्तमानोपदेशेन कुतो योग्यतानि
त्यसर्वगतादिविशेषणेश्वरसरूपत्वात्। शाश्वत इत्येकरूपत्वमात्रमुक्तं। स्थाणुशब्देन नैमित्तिकम
न्यथात्वं निवारयति। नित्यत्वसर्वगतत्व विशेषणं। अन्यथा पुनरुक्तेः। ऐक्योक्तावपि विशेषणो अनुक्त
पादानान्नेश्वरैक्ये पुनरुक्तिः। युक्ताश्च बिंबधर्माः प्रतिबिंबविरोधे। तत्र च स्वरूपं प्रतिरूपो ब रूपं
भव। आभास एव चेत्याद्रिश्रुतिस्मृतिसिद्धा। न चांशत्वविरोधः। तस्यैवांशत्वात्। न चैकरू
पैवांशता। प्रमाणं चोभयविधवचनमेव॥ न चांशस्य प्रतिबिंबत्वं कल्प्यं। गाध्यादिष्वंशस्य
र बाहुरूपदृष्टेरितरादृष्टेः। स्थाणुत्वेप्यपेक्षन्ते साधु विरुद्धधर्मा ईश्वरस्य। उभयविधवाक्यादचिं
त्यशक्तेश्च। न च मायैवैक्यं। त्वयीश्वरे ब्रह्मणि ईसाद्यैश्वर्येणैव विरुद्धधर्माविरोधोक्तेः। महतातसयत्रि।
नो विरुध्यते। न योगित्वादीश्वरत्वात्। चित्रं न चैतत्त्वयि कार्यकारण

७ स्फुलिंगसंवर्तकयोर्यदंतरं तदंतरं विष्णुहिरण्यगर्भयोः। अनंतत्वान्महाविष्णोस्तदंतरमनंत
कं॥ महात्म्यसूचनार्थायैतस्योदाहरणमितिरितं॥ न तत्समोह्यधिको वापि नैकःश्वेतल्कुदाचन। एतेन स
त्यवाक्येन तमेव प्रविशाम्यहं॥ इत्याह॥ तत्रैव शिवं प्रति मार्कंडेयवचनं। संसारार्णवनिमग्न इ
दानीमुक्तिमेष्यसीत्यादि पाद्मे॥ शैवे मार्कंडेयकथाप्रबंधे शिवान्निषिध्य विष्णोरेव मुक्तिमाह।
अहं भोगप्रदो वत्स मोक्षदश्च जनार्दनः। इत्यादिसमत्रत्वविरोधाच्च। वेदश्चेतिहासाद्यनुरोधे
आदि नयोज्यः। यदिविद्यादितिवचनात्। अनिर्णयाच्चेद्द्रादिशं कुर्यान्यथा॥ तत्रापीष्टसिद्धिः।
नाम वैशेष्यात्। अतो भगवदुत्कर्ष एव सर्वागमानां महातात्पर्यं। तथा स्वतः प्रामाण्यात्स
र्वेवाच्यते अविरोधात्। न च प्रमाणसिद्धस्य अन्यत्रादृष्टस्यापन्हवो युक्तः। धर्मवैचित्र्यादर्श
ने। स्वतः प्रामाण्यानंगीकारे च मनोक्तावदोषत्वं न साधयेदित्यतिप्रसंगः। अनन्यापेक्षया
च तत्परत्वं सिद्धमागमानां। नारायणपरा वेदाः। सर्वेवेदा यत्पद१मामनंति। वासुदेवपरा
वेदा इति। न चैतद्विरुद्धं। ईश्वरनियमात्। अनादेश्च न त्वसिद्धं। द्रव्यं कर्म च कालश्च स्वभावः॥

विष्णुमाहात्म्यलेशस्य विभक्तस्य च कोटिधा॥ पुनश्चानंतधा तस्य पुनश्चापि ह्यनंतधा। नै
कांशसममाहात्म्याः श्रीशेषब्रह्मशंकराः॥ इति नारदीये। अन्योत्कर्षे ऐक्यं च तथैव सर्वशा
स्त्रेषु महाभारतमुत्तमं॥ कोह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेदित्यादिनेर्थोत्तरसि
द्धोत्कर्षमहाभारतविरुद्धं। तत्र हि नास्ति नारायणसमं न भूतं न भविष्यति। एतेन सत्यवा
क्येन सर्वार्थान्साधयाम्यहं। यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः। न त्वत्समोभ्य
स्तीत्यादिषु साधारणप्रश्नावसर एव महांतमुत्कर्षं विष्णोर्वक्ति। अन्यत्र यत्किंचिदुक्तावपि
असाधारण एवावसरे। तद्धर्मग्न्यादेरपि वेदादावस्ति। त्वमग्न इंद्रो वृषभः सतामसि त्वं वि
ष्णुरुरुगायो नमस्यः। विश्वस्मादिंद्र उत्तर इत्यादिषु तद्वृथविरोधाच्च। तथाहि। स्कांदे शैवे वा य
दंतरं व्याघ्रहरींद्रयोर्वने यदंतरं मेरुगिरींद्रविंध्ययोः। यदंतरं सूर्यसुरेज्यबिंबयोस्तदंतरं रु
द्रमहेंद्रयोरपि। यदंतरं सिंहगजेंद्रयोर्वने यदंतरं सूर्यशशांकयोर्दिवि। यदंतरं जाह्नविसूर्यक
न्ययोस्तदंतरं ब्रह्मगिरीशयोरपि। यदंतरं मलयजवारिबिंदुषोर्यदंतरं स्तंबहिरण्यगर्भयोः

प्रयुक्ताश्च पुंसां श्रेयः प्रसिध्यय इति वचनाद्भगवते । नेतरौ सांख्ययोगौ उपादेयत्वेन विवक्षि

तौ । कुत्रचित्सामस्त्येन कर्मयोगस्यादिमयोगाच्च । निंदितत्वाच्चेतरयोर्मोक्षधर्मेषु । भिन्नमत
त्वमुक्त्वा पंचरात्रस्तुत्या । वेदानां त्वेकार्थत्वान्न विरोधः । पार्थक्यं तु सांख्याद्यपेक्षया युक्तं ॥
तत्रैव चित्रसिखंडिशास्त्रं पंचरात्रमूलं वेदैक्योक्तेश्च । एवमेव सर्वत्र सांख्ययोगशब्दः । उपाद
यपरो वर्णनीयः । युक्तेश्च । ज्ञानं हि पूर्वजैर्वमुक्तं । उपायश्च वक्ष्यते । बुध्यते नयेति बुद्धिः सांख्य
विषया यया वा चाबुध्यते सा वाभिग१हितेत्यर्थः । योगइमांश्रृण्विस्युक्तं । बह्व्यो हि बुद्धयो मत
भेदात् । तत्कथमेकत्र निष्ठां करोमीत्यत आह । व्यवसायात्मिका बुद्धिरिति । सम्यक्युक्तिनि
र्णीतानां मतानामैक्यमेवेत्यर्थः । सुरवेदिकानि मतान्यवसायात्मिकानि न तु वेदिकानि । तेपि
हि केचित्कर्माणि स्वर्गादिफलान्येवाहुरित्यत आह । यामिमामिति । यामाहुस्तुथेत्यन्वयः ।
मोक्षफलमपेक्ष्य स्वर्गादिपुष्पयुक्तां वाचं प्रवदंति । वेदवादरताः कर्मादिवाचकवेदरताः । वे
दयन्मुखतः उच्यते तत्रैव रताः । नान्यदस्तीतिवादिनः परोक्षविषया वेदाः परोक्षप्रियाश्च
हि देवाः ॥

प्रयोजकत्वं तु पूर्वोक्तन्यायेन अतः सिद्धमेतत्। तस्मानन्यापेक्षया चिंत्यशक्तित्व एव। अतो नमा
यामयं। अचलत्वं च प्रहर्षमिनानंदमदुःखसंसुखं न प्रज्ञं। असद्धेत्यादिव क्रियादेशः। न पो मे हृ
दये साक्षात्तनुर्विद्या क्रियाकृतिरित्याद्युक्तेः। अतश्च नमायामयं। ऐश्वर्यादिवाचिभगवच्छब्देनैव
संबोधनाच्च। तं त्वा भर्गेत्यादौ। स्वरूपत्वान्नमायामयत्वं युक्तं विज्ञानशक्तिरहमासमनंतशक्तेः।
मय्यनंतगुणेनंते गुणतोनंतविग्रहे। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रि
या चेत्यादिवचनात्। अत एवाव्यक्तादिरूपः। अस्त्वेवमात्मनो नित्यत्वं। तथापि देहसंयोगवि
योगात्मकजनीमृती स्त एवेत्यत आह। अथेति। कुतो शोकः नियतत्वादित्याह। जातस्येति। तद्
वस्पष्टयति। अव्यक्तादीनीति। देहयोगवियोगस्य नियतत्वादात्मनश्चैश्वरस्वरूपत्वात्सर्वथाना
शान्न शोकः कार्यः। स्वरूपं संहर्तुमैश्वर्यसामर्थ्यं पुनर्दर्शयति। आश्चर्यवदिति। दुर्लभत्वेनेर्थः।
तस्याश्चर्यं लोके। दुर्लभोपीश्वरस्वरूपत्वात्सूक्ष्मत्वाच्चात्मनस्तन्न दृष्टा। सांख्यं ज्ञानं शुद्धा
त्मतत्वविज्ञानं सांख्यमित्यभिधीयत इति भगवद्वचनाद्व्यासस्मृतौ॥ योग उपायः। दृष्टा योगाः

भवतीति साम्यमेवेत्यत आह। यावानर्थ इति। यथा यावानर्थः प्रयोजनं कूपे भवति। तावान् सर्वतः
१ संप्लुतोदके नर्भवति। एवं सर्वेषु वेदेषु यत्फलं तद्विजानतो ब्राह्मणस्य फलं भवति। ब्रह्माणतीति ज्ञानिनो
ब्राह्मणः अपरोक्षज्ञानी स हि ब्रह्म गच्छति विजानत इति ज्ञानफलत्वं तस्य दर्शयति। कामा
त्मनां निंदा कृता कथमेषां स्वर्गकामो यजेतेत्यादौ कामस्यापि विहितत्वादित्यत आह। कर्मण्ये
वेति। तरति उपलक्षणार्थो। तव ज्ञानिनोऽपि न फलकामकर्तव्यता किमन्येषां। न त्वस्ति केषांचि
न्नास्तीति। स हि ज्ञानी नरांशः कृष्ण। मोहादिस्त्वमभिभवादेः यदि तेषां स्तुत्यसत्वानां न स्यात्।
ज्ञाने कृत्यन्येषां उपदेशादृष्ट्या सिद्धं ज्ञानं तेषां। पार्थश्रिषणाद्यादिज्ञानिगणनार्थं। कामनिषेध
एवात्र। फलानि स्वस्वातंत्र्येण भवंति। न हि कर्मफलानि कर्माभावे यत्नतो भवंति। भवंति कामस्य क
र्मिणो विपर्ययप्रयत्नेप्यविरोधः अतः कर्मकरण एव प्रसवायः। न तु ज्ञानादिना ऽकामानया
वा फलाप्राप्तेः। अतः कर्मण्येवाधिकारः। अतस्तदेव कार्यं न तु कामेन ज्ञानादिनिषेधेन फल
प्राप्तिः। कामवचनानां तात्पर्यं भगवतादेरवोक्तं। रोचनार्थं हि स्तुतिः। यथा भैषज्यरोचन

मां विधत्तेभिधत्ते मामित्यादिभिः परोक्षेण प्रायो भगवंतं वदंति। भोगैश्वर्यगतिं तत्रास्ति त्र
तिनत्सास्तिफला एव वेदा इति वदंतीत्यर्थः। तेषां सम्यग्युक्तिनिर्णयात्मिका बुद्धिः समाधौ समा
ध्यर्थे न विधीयते सम्यग्निर्णीतिं नां हीश्वरे मुनः समाधानं सम्यग्भवति। तद्धि मोक्षसाधनं। उ
क्तं चैतदन्यत्र न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः। समासन्। स्वप्ने निरुक्त्या गृहमेध
सौख्यं न यस्य हेयानुमितं स्वयं स्यात्। तां योगबुद्धिमाह। त्रैगुण्यविषया इत्यादिना। इतरदपाद्यं।
वेदानां परोक्षार्थत्वात्त्रिगुणसंबंधिस्वर्गादिप्रतीतार्थ इव भाति। परोक्षवादो वेदोयमिति स्क
न्धे। अतः प्रतीतिति वृक्षेर्थे भ्रांतिं मा कुर्वित्यर्थः। वेदविषयत्वेन च मुखतो वचनं स्मृतं इत्यभिधानात्।
न तु वेदपक्षो निषिध्यते। वेदे रामायणे चैव पुराणे भारते तथा। आदावंते च मध्ये च विष्णुः सर्वत्र
गीयते। सर्ववेदा यत्पदमामनंति। वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां। आचारश्चैव सा
धूनां आत्मनस्तुष्टिरेव च। वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः इति वेदानां सर्वात्मना वि
ष्णुपरत्वोक्तेः। न ह्यहितस्य तद्विरुद्धस्य धर्माधर्मच्छेश्च। तथा काम्यकर्मिणां फलं ज्ञानीनां फलं

मित्यादौ भागवते। अत एव कामीय जेतेत्यर्थः। नतु कामी भवेत्यर्थः। निष्कामं ज्ञानपूर्वं चेति वचनात्
वक्ष्यमाणे स्पष्टत्वेति वृसंतेवसंते तज्ज्योतिषायजेतेत्यादिष्टव्यश्च। अतो कर्मणि फलहेतुर्मा भूः कर्मफलंत
त्कृतो हेतुर्यस्य स कर्मफलहेतुः। समासः। न हि निष्करोमीत्यत आह। मा त इति। कर्माकरणे स्नेहो मास्त्
दित्यर्थः। अन्य फलाभावेऽपि मत्प्रसादाख्य फलभावात्। इच्छा तस्य युक्ता। तूष्णीमहं तपरीतोषणाये
त्यादिमहदाचारात्। अनिंदनाद्विशेषतस्त्वितरनिंदनाच्च। सामान्यविशेषबोधत इति त्वप्रसिद्धं। स
न र्वानर्थैनैकमेवं मित्यादौ नैकात्म्यतां मे स्पृहयंतीति चित। भक्तिमन्विच्छंतं ब्रह्म जिज्ञासा विज्ञाय प्र
ज्ञादृष्टव्यः। इत्यादिवचनेभ्यः स्वार्थसिद्धं प्रतीति न तथा स्नेहः। विंदहामीत्यत्रैसेवा द्विपाचक्षुः प्रतिबद्ध
नरस्नेह इति। लोकसिद्धन्यायाच्च। भक्तिज्ञानादिप्रार्थनाकार्या इति सिद्धं। पूर्वश्लोकोक्तं स्पष्टय
ति। योगस्थ इति। योगस्थः उपायस्थः संगं फलेस्नेहं त्यक्त्वा तनु सिध्यसिध्योः समो भूत्वा स एव
च मयोक्तो योगः। इतश्च योगाय युज्यस्वेत्याह। दूरेति। बुद्धियोगात् ज्ञानलक्षणादुपायात् दूरेण
कर्म नीव। अतो बुद्धौ शरणं ज्ञाने स्थितं। फलं कैतो हेतुर्येषां ते फलहेतवः। ज्ञानफलमाह। बुद्धियुक्त इति।

सुकृतमप्यप्रियं मानुषादिफलं जहाति। नब्रह्मत्वमप्युपासननिमित्तं। न हास्य कर्म क्षीयते। अवि
१० दित्वास्मिँल्लोके जुहोति। यजते तपस्तप्यते। बहूनि वर्षसहस्राण्यंतवदेवास्य तद्भवतीत्यादिश्रुति
भ्यः। अतः कर्मक्षयश्रुतिः अज्ञानविषया सर्वत्र। उभयक्षयश्रुतिरनिष्टविषया। न हीष्टपुण्य
क्षये किंचित्प्रयोजनं। न चेष्टनाशो युक्तः। इष्टाश्च केचिद्विषया। स यदि पितृलोककामो भवति।
संकल्पादेवास्य पितरः समुत्तिष्ठंति। प्रजापतेः सभां वेश्म प्रपद्ये यशोहं भवामि ब्राह्मणानां। स्त्री
भिर्वा यानैर्वा ज्ञातिभिर्वा। अस्मात्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते। कामान्नी कामरूप्यनु
संचरन्। स एकधा भवतीत्यादिश्रुतिभ्यः। बहुत्वेप्यात्मसुखस्य पुनरिष्टत्वात्कर्मसुखेन विरोधः।
अनुभवशक्तिश्चेश्वरप्रसादात्। श्रुतेश्च। न च शरीरपातात्पूर्वमितत्। स तत्र पर्येति। एतमानंद
मयमात्मानमुपसंक्रम्येत्यारूढनरश्रवणात्। न च एकीभूत एव ब्रह्मणा सः। मग्नस्य हि परेज्ञा
नेकिल दुःखतरं भवेदित्यादिनिंदनात्। मोक्षधर्मे परिहारे पृथग्भोगाभिधानाच्च। सुखादीनां
पृथक्दृष्टेश्च। जगद्व्यापारवर्जमित्याद्यैश्वर्यमर्यादोक्तेश्च। इदं ज्ञानमुपाश्रित्य मम साधर्म्यमाग
ता इति च। १०

कथं तन्नैव स एकधेत्यादिश्रुत्यात्। नच न ह वै सशरीरस्येत्यादिविरोधः। वैलक्षण्यात्तच्छरीराणां। असौ
११ तिकानि हि तानि नित्योपाधिविनिर्मितानि ईश्वरशक्त्या तथा चोक्तं शरीरं जायते तेषां षोडश्या कल
रा येव तु इति नारायणस्कान्दकल्पे। वदंति च लोके विलक्षण्येः मानुषशब्दैः अप्रहर्षमना नेदं सुखदुःख
बाह्य इत्यादिषु निरस्तस्य भावात्। नतानि शरीराणि तथा हि श्रुतिः अशरीरिरिति। तच्छरीरमेभ
वदिति। न हि तानि शीर्णानि भवंति। सर्गेपि नोपजायंते प्रलये न व्यथंति चेत्यादिवचनात्। साम्या
त्मयोगः। प्रयोगात्त्वं। अनिंद्रिया निराहाराः अनिष्पंदाः सुगंधिनः दहं ह्रियासु हीनानां वैकुंठ
मे पुरवासिनां इत्यादिदृष्टदेहा एव। न चैषां न्या गौणी मुक्तिः बहुनाम् विमुक्तेन यावच्छ्वेतं न गच्छ
ति। योगी तावन्न मुक्तः स्यादेष शास्त्रस्य निर्णय इत्यादित्य पुराणे। न द्वन्द्व मुक्ति निषेधात्। यत्व
त्रैव भगवंतं प्रविशंति। ते पिपश्यान्तन्त्र याति। योग्यत्वं चात्र विवक्षितं। युधिष्ठिर प्रश्नइत्तरं निं
दनात्। सायुज्यं च गृहवत्। तद्धुक्तेश्च। भुंजते पुरुषं प्राप्य यथा देवग्रहादयः। तथा मुक्ता वुत्त
मा यांबाह्यभोगास्तु भुंजत इति नारायणाष्टाक्षरकल्पे। अतो नित्यस्यैव वियोगः। सोस्त्व

उपाधिनाशेनाशाच्च प्रतिबिंबस्य न चैकीभूतस्य पृथक्ज्ञानमानं। पश्यामः। असंदुरवीनासमि
ति। ज्ञानविरोधाच्चेश्वरस्य। अनेनरूपेणेति च। भेदाभावात्तु। न च प्रतिबिंबस्य बिंबैक्यं पश्यामः।
उपाधिनाशेमानं वा। मग्नस्य परे ज्ञाने इति दुरवात्मवृत्तोक्तेः। यावदात्मभाविलादिरूपाधि
त्यताभिधानाच्च। अतोन्यवचनं प्रतीतिमानमप्यौपचारिकं। दृष्टांश्चैते भगवता भिन्नानारदेन
प्रतिशाखं चास्पस एवबुधेत्यादिषु भेदेन प्रतीयंते। विरोधे तु युक्तिमतामेव बलवत्वं। युक्तयश्चा
त्रोक्ताः मग्नस्यहीत्यादयः। अतो जले जलैकीभाववदेकीभावः। उक्तं च। यथोदकं शुद्धो यथान
घरस्यादौ तत्राप्यन्योन्यात्मलवृध्यसंभवः। अस्ति विषस्य समुद्रेपि। ह्रासिमहत्वादन्यत्राद्दष्टिः।।
ता एवापोदद्दौ तस्य सव्यपिशंशितवृतः। इति मलाकौ मैसम थानोभेदज्ञानोच्च। नैव तत्सामु
स्येते ब्रह्मेशानादयः। सुराः। यत्ते पदं हि कैवल्यमिति निषेधाच्च नारदीये। स विचारश्च निर्णयः।।
कृतो मोक्षधर्मेषु बलवांश्च स विचारो निर्णयो वास्यमात्रात्। अतोय ननान्यस्य स्यतीत्याधुपि
तदधीनसत्तादिवाच्चि। अन्यथा कथमैश्वर्यादिस्यात्। न च तत्मायामयं इत्युक्तमन्यथा कथमैश्व

शुद्ध

गवन्महिमादिश्रवणे चिरत्निर्भवति। आत्मारामाहि मुनयो निर्ग्रंथाअप्युरुक्रमे। कुर्वंत्यहैतुकीं २
१२ भक्तिमित्थंभूतगुणोहरिः इति। श्रवणात्। अनुष्ठानाच्च शंकरादीनां। नचैतेषां फलं नास्ति। तस्यैव सुरं
महत्सुखत्वात्तेषां। यानिर्वृतिस्तनुभृतांतव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्॥
साब्रह्मणि स्वमहिमन्यपि नाथ माभूत् किंत्वंतकासिलुलितात्पततांविमानात्। इत्यादिवच
नात्। तेषामपि उपासनादिफलस्य सोधितत्वात्। तारतम्यादिगतेश्च। तथाहि। यद्दितारतम्यं
नस्यात्। नांत्यंति कैकिंगणयत्यपिते प्रसादं नैकात्मतां मे स्पृहयंति केचित्। एवंमत्वप्युतदी
यमानंनेगृह्णंत इति मुक्तिमप्यनिच्छतामपि मोक्षफलंतमिच्छतामपिसंभवति। सुप्रती ९व
कादीनामितिकथमनिच्छतां स्तुतिरुपपन्नास्यात्। श्रवणाच्च। यथाभक्तिविशेषेण दृश्य
तेपुरुषोत्तमे। तथा मुक्तिविशेषोपिज्ञानीनां लिंगभेदने। योगीनां भिन्न लिंगानां अविभ
न्नस्वरूपाणां आत्मानां परमानंदतारतम्यं सदैव हि इति। नतामतिशयिष्यंति। मुक्तावपिद्
यंचन। मद्भक्तियोगात्संमतज्ञानाच्च सर्वाननिशविष्यतीति च साम्यवचनं तु प्राचुर्यविषयं॥

सर्वात्मना। अदुःखं सर्वदुःखैर्वर्जिताः। अशोकमहिमं। यत्र गत्वा न शोचंतीत्यादिश्रुतिभ्यः। विशेष
वचनाभावाच्च। येषां लिंग दृश्यते तेन सायुज्यं प्राप्ताः। सामीप्याद्येव तेषां अतः प्रारब्धकर्मशेष
भावात्। तद्भुक्त्वा सायुज्यं गच्छंति। तच्चोक्तं। संकर्षणादयः। सर्वेस्वाधिकारादनंतरं। प्रविशंति परं
देवं। विष्णुं नोत्र संशयः इति। व्यासयोगे। अतो लिंगस्य सर्वात्मना वियोगः परं ब्रह्मत्वमिच्छा
मि परं ब्रह्मत्वमनुजनार्दन। इत्यादिना ब्रह्मादिभिरपि प्रार्थितत्वात्। न मोक्षसदृशं किंचिदधिकं
वा सुखं क्वचित्। ऋते वैष्णवमानंदं वाङ्मनोगोचरं महत्। इत्यादेश्च ब्रह्मादिपदादपि अधिकृत
मं सुखं चैव मोक्ष इति सिद्धं। अतो योगाय युज्यस्व। ज्ञानोपायं तद्धि कर्मकौशलं। तदुपायमाह। पा
कर्मजमिति। कर्मजं फलं त्यक्त्वा कामनया ईश्वराय समर्प्य। बुद्धियुक्ताः सम्यक् ज्ञानिनो भूत्वा
पदं गच्छंति। स योगः कर्मज्ञानसाधनं। तन्मोक्षसाधनमिति भावः। कियत्पर्यंतमेवश्यं कर्तव्या
नि मुमुक्षुणैवं कर्माणीति आह। यदेति। निर्वादं नितरां लाभं। प्रयोगात्। तस्माद्ब्राह्मणः पांडि
त्यं निर्विद्येत्यादिना हि तत्र वैराग्यमुपपद्यते। तथासति पांडित्यादिति स्यात्। न हि ज्ञानिनां भ

येगुह्यवित्तये। नतेगुह्याः प्रतीयंते पुराणेष्वल्पबुद्धिनामिति वचनात्। गमनादिप्रवृत्तिनिरि
१३ भिसंधिपूर्विकाः मलादिप्रवृत्तिवदिति यानिशात्यादिनादर्शयिष्यन्‌लक्षणंप्रथमतआह। एवंप
रानंदतृप्तः किमर्थंप्रवृत्तिंकरोतीति प्रश्नाभिप्रायः। प्रारब्धकर्मलेशवतिरोहितब्रह्मणोवासनया
त्रायाल्पाधिप्रवृत्तयः संभवंतीत्याशयवान्परिहरति। प्रायः सर्वान्प्रजहाति। शुकादीनाम
पीषद्दर्शनात्। तस्मादप्रवृत्तिमिच्छति ज्ञानिनस्सर्वदर्शिन इत्युक्तेस्तामिच्छंति। यद्यालोच्यदीनामा
ग्रहोदृश्यते नह्यभीप्सितं तेषांज्ञाने। तस्योक्तं। अधिकारिकपुंसांतु बहुलकर्मत्वकारणात्। उद्भ
वाभिभवौज्ञाने ततोन्येभ्योविलक्षणाइति। अतएववैलक्षण्यादनधिकारिणामन्नादिष्वर
स्तिनतज्ज्ञानिनइत्यवगंतव्यं। नचात्रसमाधिंकुर्वतोलक्षणमुच्यते। यः सर्वत्रानभिस्नेह इति
स्नेहनिषेधात्। नहिसमाधिंकुर्वतस्तस्यशुभाशुभप्राप्तिरस्ति। असंप्रज्ञातसमाधेः। संप्रज्ञा
तेनविरोधः। तथापिनतत्रैवेति। नियमः। कामादयोनजायंतेह्यपिविक्षिप्तचेतसां। ज्ञानिनां
ज्ञाननिर्धूतमलानांदेवसंश्रयादितिस्मृतेः। मनोगताहि कामाः। अतस्तत्रैवज्ञानोत्पत्तेरयुक्तं।

दुखाभावविषयंच। तथोचोक्तं दुखाभावः। परानंदो लिंगभेदः। सममामताः। तथापि परमानंदोज्ञा
नभेदात्तु विद्यतरतिनारायणष्टाक्षरकल्पे। अतो न वैराग्यं श्रुतादावत्र विवक्षितं। न च संकोचमा
नं किंचित्। विद्यमानरतरत्र प्रयोगमहद्भिः श्रवणीयस्य श्रुतस्य वेदादेः फलं प्राप्स्यसीत्यर्थः। तदेव
स्पष्टयति। श्रुतिविप्रतिपन्नेति। प्रवृत्तिश्रुतिभिर्विप्रतिपन्ना विरुद्धा सती यदा वेदाधानुकूलेन त
त्वनिश्चयेन विपरीतवाग्भिरपि निश्चला भवति। ततश्च समाधावचला ब्रह्म प्रत्यक्षदर्शनेन
भरितानादावपि परमानंदमग्नत्वात्तत्त्वयोगमवाप्स्यसी उपायसिद्धो भवसीत्यर्थः। स्थिता
प्रज्ञा ज्ञानं यस्य स स्थितप्रज्ञः। भाष्यते नयेति भाषा लक्षणमित्यर्थः। उक्तं लक्षणमनुवदति। ल
क्षणांतरं पृच्छामीति स्थिता पश्चित्तु समाधिस्थस्येति। कं ब्रह्माणमीशं रुद्रं च वर्तयतीति केशवः। तथा
हि निरुक्तिः। कृता हरिवंशेषु रुद्रेण कैलासयात्रायां। हिरण्यगर्भः कः प्रोक्तः ईशः शंकर एव च। स
र्व्या दिनावर्तयति तौ यता केशवः भवानुरतिवचनोत्तरा च। किमासीत किं प्रत्यासीत। न चार्जुनो
न जानाति लक्षणादिकं। जानंति सर्वे राजानो देवर्षयस्तथैव च तथापि धर्मान्पृच्छंति वा नो॥

शरीराभिमानिनः क्रोदोषः ततः प्रमाथिनि प्रमथनशीलानि पुरुषस्य तत्परिशक्यानेवेसत आह।
नानीति। बुद्धियत्नवतः। शक्यान्यतो यत्नं कुर्यादित्याशयः। युक्तः मयि मनो युक्तः अहमेव परः

सर्वस्मादुत्कृष्टो यस्य सः मत्परः फलमाह। वशेहीति। रागादिदोषकारणं मोहपरिहाराय श्लो
कद्वयेन। संमोहो कार्याविवेकः। तथाहि। मोहशब्दार्थ उक्तः उपगीतायां मोहसंक्षितं अधर्मलक्षणं
चैव नियतं पापकर्मस्विति। तथा चान्यत्र संमोहो धर्मकामितेति। स्मृतिविभ्रमः प्रतिषेधा
दिस्मृतिनाशः बुद्धिनाशः सर्वात्मनाऽदोषबुद्धिनाशः विनश्यति। नरकाद्यनर्थं प्राप्नोति। तथा
ह्युक्तं। अधर्मकामिनः शास्त्रविस्मृतिर्जायते। पदादोषदृष्टेस्तत्कृतेश्च नरकं प्रतिपद्यतइति।
इंद्रियजयफलमाहोत्तराभ्यां श्लोकाभ्यां विषयाननुभवन्नपि विधेयात्मा मनो यस्य
सजितात्मा इत्यर्थः। प्रसादं मनःप्रसादं कथं प्रसादमात्रेण सर्वदुःखहानिः। प्रसन्नचेतसो
हि बुद्धिः पर्यवतिष्ठति। आत्मापरोक्ष्येण सम्यक् स्थितिं करोति। प्रसादो नाम स्वतोऽपि प्रायो
विषयावगतिः। प्रसादाभावे दोषमाहोत्तराभ्यां श्लोकाभ्यां। न हि प्रसादाभावे युक्तश्चित्त नि
रोधः।

हानं तेषामिति दर्शयति। मनोगतानि विरूद्धश्चोच्यते। रसोप्यस्य परं दृष्ट्वा निवर्तत इति च। न चैतद्दृष्ट्या
ऽपलपनीयं। पुरुषवैशेष्यात्। आत्मना परमात्मना। परमात्मन्येवस्थित आत्माख्येतस्मिन्नु स्थि
तस्य तत्प्रसादादेव तुष्टिर्भवति विषयास्तु परिसज्यरामे स्थितिमतः स्वतः देवाद्भवं तिवितुष्टिर्नान्यथा
तु कथं चनेति। नारायणरामवल्ले। अतो नात्माजीवः एतदेव स्पष्टयति। उत्तरैस्त्रिभिः श्लोकैः। एता
न्यवज्ञानोपायानि। तत्प्रोक्तं। न हि जिज्ञासुभिः साध्यं ज्ञानिनां यत्तु लक्षणमिति शोभनाध्यासौ रो
गः। रसो रागस्तथा रुचिः शोभनाध्यास उच्यते। इति अभिधानात्। सर्वत्रानभिस्नेहत्वात्। शुभा
शुभं प्राप्य नाभिनंदति न द्वेष्टि। न चैतल्लक्षणं ज्ञानमंतरेणापि भवतीत्याहोत्तरैः श्लोकैः। निराहा म
रत्वेन विषयभोगसामर्थ्याभाव एव भवति। इतर विषयाकांक्षाभावो वा। साकांक्षादिषु त्वनुनि र
वर्तते। सत्वपरोक्षज्ञानादेव निवर्तत इत्याह। विषया इति। इंद्रियाणि जयंत्याशु निराहारमनीषि
णः। वर्जयित्वा तु रसनाम सो रस्य त्ववर्धत इति वचनाद्रागवते। रसशब्दस्य रागवाचित्वाच्च।
अपरोक्षज्ञानरहितज्ञानिनोपि साधारणयत्नवतो यततोपि मनोहरंतींद्रियाणि। पुरुषस्य

कामानुविषयानुनिस्पृहतया विहायैश्चरति। भक्षयति। भक्षयामीत्यहंकारममकारवर्जितश्च स
१५ हि पुमान्स एव मधिगच्छति। इत्यर्थः। उपसंहरति एषेति। ब्राह्मीति। स्थि० ब्रह्मविषया स्थितिं कक्ष
णं। अंतकालेप्यस्यां स्थितौ सैव ब्रह्म गच्छति। अन्यथा जन्मांतं प्राप्नोति। यंयंवापीति वक्ष्यमाणत्वात्॥
ज्ञानीनामपि सति प्रारब्धकर्मणि शरीरांतरं प्राप्नोतीति युक्तं। भोगेन त्वितरे इति वक्तुं। संति हि बहुशरीर लि
फलानि कर्माणि कानिचित्। सप्तजन्मनि। प्रविश्य स्यादित्यादेः। दृष्टेश्च ज्ञानिनामपि बहुशरीरप्राप्तिः
तथाप्युक्तं। स्थितप्रज्ञोपि यस्त्वर्थः प्राप्य रोद्रपदं ततः। सोवूषणेंततो मुक्तिमगाद्विष्णुप्रसादतः इ
ति गारुडे। महादेवः परे जन्मन्येव मुक्तिर्निरूप्यत इति चनारदीये। निश्चितफलं च ज्ञानं तस्य तावदेव
चिरं यदुच्चना विषिमेवाभिसंभवतीत्यादिश्रुतिभ्यः। नचकायव्यूहापेक्षा। तद्यथैषिकातूलं॥
तद्यथापुष्करपलाशो ज्ञानाग्निः सर्वकर्माणि हादिवचनेभ्यः आरब्धेत्वविरोधः। प्रमाणाभावाच्च।
नचतच्छास्त्रं प्रमाणं। अक्षपादकणादादीनां सांख्ययोगजदाभ्रतां मतमालंब्य यवेदं दूषयंसस्य
चेतस इति निंदनात्। यत्र तु स्तुतिस्तत्र शिवभक्तानां स्तुतिपरत्वमेव न सत्यत्वं। न हि तेषामपि इतर

तस्मात्सर्ववासनानिगृहीतेंद्रियएववशीनीति॥ निगमयति।

अयुक्तस्यबुद्धिःसम्यग्ज्ञानंनास्ति।तदेवोपपादयति।नचायुक्तस्येति।शांतिर्मुक्तिःशांतिर्मोक्ष
थनिर्वाणमित्यभिधानात्।कथमयुक्तस्यभावनानभवतीत्याह।इंद्रियाणामिति।अनुविधीयत
क्रियते।नन्वीश्वरेणेंद्रियाणामनुवृत्तिर्ज्ञानमित्यादिवक्ष्यमाणत्वात्।प्रज्ञांप्रज्ञानं।उक्तस्यदपि
नीवारयतीत्यर्थः।उक्तंतस्यामिभवोभवति।तस्मादिति।उक्तलक्षणंपिंडीकृत्याह।यानिशेति।
यानिशासर्वभूतानांनिशापरमेश्वरस्वरूपलक्षणायस्यांसुप्तानविंदंतिज्ञानेति।तस्यामिंद्रियसं
युक्तोज्ञानीजागर्ति।सम्यगपरोक्षेणपश्यतिपरमात्मानमित्यर्थः।यस्यांविषयलक्षणायां
भूतानिजाग्रतितस्यांनिशायामिवसुप्तःप्रायोनजानाति।मनादिविद्धमनादिप्रवृत्तिः।तदुक्तंदेहंतु।च
न।चरमदेहोपिदैववशागइति।श्लोकाभ्यांमननयुक्तोमुनिःपश्यतस्तस्यहिसाधनमाहितेनवि
षयानुभावप्रकारमाह।आपूर्यमाणमिति।विषयैरापूर्यमाणोपि।अचलप्रतिष्ठोभवति।नोत्सकं
प्राप्नोति।नचप्रयत्नंकरोति।नचाभावेशुष्यति।नहिसमुद्रःसरित्प्रवेशाभ्यांनिमित्ताभ्यांविशे प्रवेश
षोवहुतरोप्राप्नोति।प्रयत्नंवाकरोति।समुक्तिमाप्नोतीत्यर्थः।एतदेवप्रपंचयति।विहायेति॥

तिशब्द्यत इति भावः ते। भगवंतं परं ब्रह्म परं ब्रह्म जनार्दनः। परमं व्योम हृद्ब्रह्म। यस्मात्क्षरमतीतोह
१६ मक्षरादपि चोत्तमः। योसावतींद्रियग्राह्यः। नास्ति नारायणसमं न भूतो न भविष्यति। न तत्समो
स्त्यभिधिकः कुतोन्य इत्यादिश्रुत्यः। न च तद्ब्रह्मणो शरीरत्वादेतत्कल्प्यं। तस्यापि शरीरश्रवणात्। अ
नंदरूपममृतं सुवर्णज्योतिः। दहरोस्मिन्नंतराकाश इत्यादिषु। यदि रूपं न स्यात्। आनंदमित्येव स्या
त्। न त्वानंदरूपमिति। कथं सुवर्णरूपत्वं स्यादरूपस्य कथं च दहरत्वं। दहरस्थश्च क्वचित्स्वदेहेत्यादे
रूपवानुच्यते। सहस्रशीर्षा पुरुषः। रुक्मवर्णं कर्तारं। आदित्यवर्णं तमसः परस्तात्। सर्वतःपाणि
पादं तत् विश्वतश्चक्षुरित्यादिवचनात्। विश्वरूपाध्याये विश्वरूपवानवसीयते। अतिपरिपूर्ण
तमज्ञानैश्वर्यवीर्यानंदश्रीशक्त्यादिमांश्च भगवान्। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी
ज्ञानबलक्रिया च। यः सर्वज्ञः। आनंदं ब्रह्मणः। एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति।
अनादिमध्यांतमनंतवीर्यं। सहस्रलक्षामितकांतिकांतं। अप्यनंतगुणानंतेगुणतोनंतविग्रहे।
विज्ञानशक्तिरहमासमनंतशक्तेः। तुर्यं तत्सर्वदृक्सदा। आत्मानमन्यं च स देवं। विद्वान्। अन्यते
मो मुकुंदात्।

ग्रंथविरुद्धार्थेऽप्रमाण्यं। तथात्वमुक्तं त्वं च मे महाबाहो मोहशास्त्राणि कारय। अतथ्यानि वितथ्यानि द
र्शयस्व महाभुज। प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु इति वाराहे। कुत्सितानि च शास्त्राणि रुद्रो विष्णुप्र
चोदितः। चकार शास्त्राणि विभुः स्वयं स तत्प्रचोदिताः। दधीच्याद्याः पुराणानि तच्छास्त्रसमयेन तु। चक्रु
र्वेदैश्च ब्रह्माणि वैष्णवानु विष्णुदैवतः। भारतं पंचरात्रं च मूलरामायणं तथा। तथा पुराणं भागवतं
विष्णुवेद इतीरिताः। अतः शैवपुराणानि योज्यान्यन्यथा विरोधतः इति नारदीये। अतो ज्ञानीनां भ
वत्येव मुक्तिः। भीष्मादीनां तु तस्मिन् क्षणे युक्तभावः। स्मरं स्त्यजति इति वर्तमानापदेशो हि कृतः। तथो
क्तं। ज्ञानीनां कर्मयुक्तानां कायत्यागक्षणे यदा। विष्णुमाया तदा तेषां मनो बाह्यं करोति हि। इति गारुडे।
न चान्येषां तु तदा स्मृतिर्भवति। बहुजन्मविपाकेन भक्तिज्ञानेन ये हरिं। भजंति न स्मृतिस्तेषां देवोपा
धिं न चान्यथैव स्तुतेः। ब्रह्मैव वेदनं। निर्वाणमशरीरं। कायो बाह्यं शरीरं चैत्यभिधानात्। एतद्बाण
मवस्थापयेति प्रयोगाच्च। निर्वाणशब्दप्रतिपादनमनिंद्रियाद्यत्वादिवत्। कथमन्यथा सर्वपुराणा
दिप्रसिद्धा कृतिर्भगवत उपपद्यते। न चान्यद्भगवत उत्तमलं ब्रह्म। ब्रह्मेति परमात्मेति भगवानि

वंचिंत्य वियेयोयोयश्च दाशरथिः स्वयं ॥ इद्गवाक्यं कृतं वृत्तमु जितेजीतवत्स्थितः । योजितोविजितो
१७ भक्त्यागांगेयं न जघान ह ॥ न चांबां ग्राहयामास कुरूणः कोपरस्ततः ॥ इत्यादिभ्यश्च ॥ स्कांदे न त
त्र संसारधर्माः निरूप्याः ॥ यत्र च परावरभेदावगम्यते ॥ तत्र चाज्ञबुद्धिमपेक्ष्यावरत्वं किंच रूपम
पेक्ष्यान्यत्वं तच्चोक्तं । परिपूर्णानि रूपाणि समान्यखिलरूपतः । तथाप्यपेक्ष्यमंदानां द्विंतामृ
पयोपिहि । परावरं वदंत्येवं ह्यभक्तानां विमोहनं ॥ इति गारुडे ॥ न चात्र किंचिदपकृष्टौदितिवाच्यं ॥ २८
अचिंत्यशक्तेः पदार्थवैचित्र्याच्चेत्युक्तं ॥ कृष्णरामादिरूपाणि परिपूर्णानि सर्वदा ॥ न चाणुमात्र
भिन्नानि । तथाप्यस्मान्न विमोहयसीत्यादेश्च ॥ नारदीये । तस्मात्सर्वरूपेष्वनंतगुणगणं नित्य नूसर्वदा
निरस्ताशेषदोषं च नारायणाख्यं परं ब्रह्मापरोक्षज्ञानान्न पृच्छतीति च सिद्धं ॥ इति श्रीमदानंद
तीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये द्वितीयोध्यायः ॥ ॥ आत्मस्वरूपं ज्ञान
साधनं चोक्तं । पूर्वत्र ज्ञानसाधनत्वेनाकर्मविनिंद्य कर्मविधीयत उत्तराध्याये । कर्मणो ज्ञान
मसक्तमभित्यभिहितं भगवता दूरेण ह्यवरं कर्मेत्यादौ ॥ एवं चेत्किमिति घोरयुद्धाख्ये नियोजयसी ॥

कोनामलोके भगवत्पदार्थः॥ ऐश्वर्यस्य समग्रस्य अतीवपरिपूर्णंनैः सुखं ज्ञानं सौभगं॥ यच्चात्ययु
क्तं स्मर्त्तुं वा शक्ताः कर्तुं मतः परं रसादिभ्यः॥ तानि सर्वाण्यनन्यान्यस्य रूपाणि॥ विज्ञानमानंदं ब्रह्म॥
आनंदो ब्रह्मेति व्यजानात्॥ सत्यं ज्ञानमनंतं ब्रह्म॥ यस्य ज्ञानमयं तपः समाभगान्विशस्वाहा॥
न तस्य प्राकृता मूर्तिर्मांसमेदोस्थिसंभवा॥ न योगित्वादीश्वरत्वात् सत्यरूपाच्युतो विभुः॥ सद्दे
हः सुखगंधश्च ज्ञानभाः सत्पराक्रमः॥ ज्ञानज्ञानः सुखसुखः स विष्णुः परमोक्षर इति पैंगिखि
लेषु॥ देहोयं मे सदानंदो नायं प्रकृतिनिर्मितः॥ परिपूर्णैश्वर्य सर्वज्ञत्वेन नारायणोस्म्यहं॥ इत्या
दि ब्रह्मवैवर्त्ते॥ तदेवलीलया चासौ परिछिन्नादिरूपेण दर्शयति मायया॥ न च गर्भे वसनु
देव्याः न चापि वसुदेवतः॥ न चापि राघवाज्जातो न चापि जमदग्नितः॥ नित्यानंदो ह्ययोप्येवं
क्रीडते मोघदर्शनः इति पाद्मे॥ न चात्मात्मवतामधीश्वरो भुंक्ते हि दुःखं भगवान् वासुदेवः॥ स्व
गादिरीशितारः परमसुखनिधिः बोधरूपोप्यबोधं लोको नादर्शयन्नु यो मुनिसुतनदत्तात्मप्रि
यार्थे जगाम॥ सब्रह्मवेद्यचरणाजनमोहनायस्त्रीसंगिनामितिरतिः प्रथयंश्चचार॥ पुत्रे

तु

१९ वाणि मुक्तानि। एवमस्मिञ्छरीरे बहूनि हि कर्माणि करोति। तानि चैवैकानि बहुजन्मफलानि कानि
चित्।। तत्र चैकानि कर्माणि भुंजन् भोगमात्येन शेषेण मानुष्यं। ततश्च बहुशरीरफलानि कर्माणि
इत्यसमाप्तिः। तच्चोक्तं। जीवश्च देशादूर्ध्वं पुरुषो नियमेन तु। स्त्रीत्वं प्राप्य न तद्दशाब्दं देहं मानुष
मार्जति। चतुर्दशाब्दजीवी न च संसारश्चादिवर्जितः। अविदित्वा परं देवं मोक्षाशा कामुकस्य मुने।।
इति ब्रह्माण्डे। यदि सादिः स्यात्संसारः पूर्वकर्माभावादतत्प्राप्तिः। अबन्धकत्वं च कामेनैव भवति।
तच्च सर्वं विवक्ष्यते। अनिष्टमिष्टंमिति। ननु निष्कामकर्मणः फलाभावान्मोक्षः स्मृतः। निष्का
मं ज्ञानपूर्वं च निवृत्तमिह चोच्यते। निवृत्तं सेव्यमानस्तु ब्रह्माप्येति सनातनमिति वामने।। अ
तत्साम्यादकारणेऽपि भवतीत्यत आह। न चेति।। संन्यासः काम्यकर्मपरित्यागः काम्यानां क
र्मणामिति वक्ष्यमाणत्वात्। अकामकर्मणामन्तःकरणशुद्ध्या ज्ञानान्मोक्षो भवति। तच्चोक्तं।
कर्मभिः शुद्धसत्त्वस्य वैराग्यं जायते यदि। इति भागवते। विरक्तानामेव च ज्ञानं उक्तं। तत्त
स्य तत्त्वग्रहणाय साक्षाद्वरीयसीर्वाचः समासन्। स्व[illegible]निरुक्त्या गृहमेधसौख्यं न यस्य

रपि　　प्रे

भाष्य १९

निवृत्तधर्मान्विनेत्याह ॥ ज्यायसीति ॥ कर्मणः सकाशाद्बुद्धिर्ज्यायसी चेत्तेमता तत्तर्हि ज्यायस्त्वे
पिबुद्धेराधिकारित्वात्त्वंकर्मण्यधिकृतइति तत्रनियोक्ष्यामीत्याशयवानाह ॥ लोकइति ॥ द्वि
विधाः अपिजनाः संति गृहस्थादिकर्मत्यागेनज्ञाननिष्ठाः सनकादिवत् । तेस्थाएवनैनिष्ठश्रज
नकादिवत् । मत्धर्मस्थाएवेत्यर्थः । सांख्यानांज्ञानिनांसनकादीनांयोगिनामुपायिनांजनकादीनां ।
ज्ञाननिष्ठाप्यधिकारित्वात् । ईश्वरेच्छयालोकसंग्रहार्थमपियेयोग्याश्वंतितेपियोगिनः नि
ष्ठास्थितिः त्वंतुजनकादिवत्सवैकर्मैवज्ञानयोग्यः । ननुसनकादिवत्तत्यागेनेत्यर्थः ॥ संतीही
श्वरेच्छयैवकर्मकृतः । प्रियव्रतादयोज्ञानिनएवतथात्मकृतं ॥ ईश्वरेच्छाविनिवेशितकर्माधिकारइति ।
इतश्च नियोक्ष्यामीत्याह । नकर्मणामिति । कर्मणामयुत्थाहीनांअनारंभेणनैष्कर्म्यनिष्कर्मतां
ज्ञान्यकर्मपरित्यागेनप्राप्यतइतिमोक्षंनाश्नुते । ज्ञानमेवतत्साधनंनतुकर्माकरणमित्यर्थः ॥
कुतः पुरुषत्वात् । सर्वहास्थूलेनसूक्ष्मेणवापुरेणयुक्तोनतुजीवः यदिकर्माकरणेनमुक्तिःस्यात् ।
स्थावराणांनचोकरणेकर्माभावान्मुक्तिर्भवति । प्रतिजन्मकृतानामनंतकर्मणांभावात् । नच स

न्यः कामयत इति श्रुतेश्च। अनिष्टमिष्टमिति वक्ष्यमाणत्वाच्च। एतान्यपि तु कर्माणि इति च। तस्मान्ने
१९ ष्टिया जुहुः स्यादिति च। विशेषवचनत्वे समेपि विशेषणं परिशिष्यते। अत्रार्थवादमाह॥ सहयज्ञा
त इति। हेत्वंतरमाह। अन्नादिति। यज्ञः पर्जन्यान्नलोत्कारणमुच्यते। पूर्वह्येयवि वक्षायांतस्य च
क्रमवेशो न भवति। तर्ह्यपार्थं कर्मविधये। न तु सामान्यमात्रं दानीं कार्यं मेघचक्राभिमानी च पर्ज
न्यः तत्र यज्ञाद्भवति। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेर
न्नः ततः प्रजा इति स्मृतेश्च॥ उभयवचनादादित्यात्समुद्राच्च विरोधः॥ अतश्च यज्ञात्पर्जन्योद्भवः
संभवति यज्ञो देवतामुद्दिश्य द्रव्यत्यागः॥ कर्मेतरत्क्रियाः कर्म ब्रह्मणो जायते। एष ह्येव साधु कर्म
कारयति बुद्धिज्ञानमित्यादिभ्यः॥ न च मुख्ये संभाव्यमाने पारंपर्येणोपचारिकं कल्प्यं। न च ज
डानां स्वतः प्रवृत्तिः संभवति। एतस्य वा अक्षरस्येति सर्वनियमनश्रुतेश्च। द्रव्यं कर्म च कालश्चेत्यादेश्च
अचिंत्यशक्तिश्चोक्ता। जीवस्य च प्रतिबिंबस्य बिंबपूर्वविचेष्टा। न कर्तृत्वमित्यादिनिषेधाच्च। अ
क्षराणि प्रसिद्धानि। तेभ्यो ह्यभिव्यज्यते परं ब्रह्मेति। अन्यथानादिनिधनं परमं नित्यं परिपूर्णमिति

हेयानुमितं स्वयं स्यादिति। ननु फलाभावात्। कर्मभावात्। अतो न कर्मत्याग एव मोक्षसाधनं यस्त्वाश्र
मस्तु प्रायस्तार्थेभिगच्छतोपर्थश्च। अप्रयतत्वे हि प्रायो गृहस्थादीनां इतरकर्मयोगात्। अप्रयतानां
चनस्नानं। तथा हि श्रुतिः। नाशान्तो नासमाहित इति। महांश्च यत्याश्रमे भगवत्तोषः॥ तथा ह्याह। यत्या
श्रमे तुरीये तु हीसामम सुतोषिण्यां। इति नारायणाष्टाक्षरकल्पे॥ अधिकारिकास्तु तस्मादेव प्रायस्ते
समर्थाः॥ सैव च भगवत्तोषः॥ तत्रोक्तं॥ देवादीनामादिराजामहो योगपिनोमतः। विष्णोश्चलि
ततद्योगेत्यतीव हरितोषणं॥ इति पाद्मे। ननु कर्माणि सर्वात्मना त्यक्तुं शक्यानि इत्याह। नहीति
तथापि शक्तितस्त्यागः कार्य इत्यत आह। कर्मेन्द्रियाणीति। मन एव प्रयोजकमिति। दर्शयितुमन्वय
व्यतिरेकावाह। मनसा स्मरन् मनसा नियम्येति कर्मयोगं स्ववर्णाश्रमोचितं। ननु महस्थ कर्मैव
तिनियमः॥ संन्यासादिविधानात्। सामान्यवचनाच्च॥ अतो नियतं वर्णाश्रमोचितं कर्म कुरु॥
कर्मणा बध्यते जंतुरिति कर्मबंधकं स्मृतमित्यत आह। यज्ञार्थादिति। कर्मबंधनं यस्य लोकस्य स
कर्मबंधनः॥ यज्ञो विष्णुः यज्ञार्थं संगरहितं कर्म न बंधकमित्यर्थः। मुक्तसंग इति विशेषणात्। कामा

चित्र जगत्सृष्टेः वेदसृष्टिरशक्या सृज्यते। न च सर्वज्ञत्वे। यद्विदकृतसर्वज्ञः स्यादिति न जगत्स्रष्टा
२० सर्वज्ञः। तस्माद्वेदप्रमाणत्वकृत्वमेवात्र विवक्षितं। अतो नित्यान्यक्षराणि। यत एवं परंपरया यज्ञा
भिव्यंग्यं ब्रह्म तस्मात्तन्नित्यं यज्ञे प्रतिष्ठितं। तानि चाक्षराणि भूताभिव्यंग्यानि इति च वक्तुं। यदेतज्ज
गच्चक्रं यो नानुवर्तयति। स च तद्विनाशकत्वादघायुः पापनिमित्तमेवास्यायुः सो घायुः। तर्हि तेन
मनःसमाधानमपि न कार्यमित्यत आह। यस्त्विति। रमणं परदर्शनादिनिमित्तं परसुखं। तद्विर
यत्रालंबुद्धिः। संतोषस्तज्जनकं। संतोषस्तु तृप्तिकारणमित्यभिधानात्। परमात्मदर्शनादिनिमि
त्तं सुखं प्राप्य। अन्यत्र सर्वत्र निरालंबुद्धिः। महत्त्वं तत्सुखं तेनैवालंबुद्धिरिति दर्शयति। आत्म
न्येव च संतुष्ट इति। तस्यैव सन्तुष्ट इत्यर्थः। नान्यत्र किमपि संतोषकारणमित्यवधारणं।
आत्मना तृप्तः न त्वात्मनि अलंबुद्धिर्युक्ता। तद्वाचित्वं तु वयं तु न वितृप्याम उत्तमश्लोकविक्र
मे रित्यादिप्रयोगात्सिद्धं। अध्याहारस्य गतिकागतिः। आत्मनिरतिरवेत्यवधारणात्। असंप्र
ज्ञातसमाधिस्थस्यैवं कार्यं न विद्यत इति वचनात्पांचरात्रे। अन्यदान्यरतिरपि द्विपत्सर्वस्यैव भवति।
स्थितप्रज्ञस्यापि कार्यं देहादि दृश्यते यदा। स्वधर्मो मम तुष्ट्यर्थं स हि सर्वैरपेक्षितेति २०

ब्रह्मकोजानाति॥ नचरूढिंविनायोगांगीकारोयुक्तः॥ परामर्शाच्च॥ तस्मात्सर्वगतं ब्रह्मेति। नह्येव
शब्देनहिरूढ्येनभेदश्रुतिंविनावस्तुद्वयंतुनचिदुच्यते। तानिचाक्षराणि नित्यानि। वाचाविरूपनित्य
या॥ वृष्णेचोदस्वसुष्टुतिं॥ अनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा॥ अतएवचनित्यत्वमित्यादि
श्रुतिस्मृतिभगवद्वचनेभ्यः॥ दोषश्चोक्तः सर्वकर्तृत्वे। नचाबुद्धिपूर्वमुत्सन्नानि॥ तत्प्रमाणाभावात्
निश्वसितशब्दस्यकृशाभिप्रायः॥ नाबुद्धिपूर्वाभिप्रायः॥ सोकामयतेत्यादेश्च॥ इष्टंहुतमित्यादि
पञ्चपंचेनसहाभिधानाच्च॥ महातात्पर्यविरोधाच्च॥ तच्चोक्तंपुरस्तात्॥ नह्यस्वातंत्र्येज्ञोत्पत्तिक
र्तुः प्राधान्यंअस्वातंत्र्यंतदमतिप्रवृत्तेनभवति। यथारोगादीनांपुरुषस्यतज्जन्यत्वेपि। उत्पत्तिव
चनान्यभिव्यक्त्यर्थानि। अभिमानिदेवताविषयाणि च। नित्यैस्तुस्त्रोत्सृष्टेतिवचनात्। अभिव्यं
जकत्वेकर्तृत्वंचास्ति। कृत्स्नंशतपथंचक्रेइति। कथमादित्यस्यैवंवेदास्तेनैवक्रियंते। वचनमात्राच्च॥
निर्णयात्मकशारीरकोक्तंबलवत्॥ शास्त्रंयोनिर्यस्येतितुशास्त्रयोनित्वं। जन्माद्यस्येत्युक्तेप्रमाणं
हितत्रापि [redacted] क्षितं। नतुतस्यजातत्वंवेदकारणत्वंवा। नहिवेदकारणत्वंजगत्कारणत्वेहेतुः। नहिवि

ज्ञानद्वाराप्यविरोधः। यत्र तीर्थादिकं मुक्तिसाधनमुच्यते। ब्रह्मज्ञाने न वा मुक्तिः प्रयागमरणेन वा
२१ अथवा स्नानमात्रेण गोमत्यां कृष्णसंनिधौ॥ इत्यादि तत्र पापादिमुक्तिः॥ स्तुतिपरं वा। तत्रापि कु
त्रचित्। ब्रह्मज्ञानसाधनत्वमेवोच्यते। अन्यथा मुक्तिं निषिध्य। ब्रह्मज्ञानं विना मुक्तिर्न कथंचिद्दर्शि
गी ष्यते। प्रयागोऽस्तु मुक्तिर्ज्ञानोपायत्वमेव हीत्यादौ॥ न च तीर्थस्तुतिवाक्यानि। तत्प्रस्तावे प्रयुक्तं। ज्ञा
नेनियमेप्रेति। यथा कथंचिद्दृष्टं भूत्यं प्रत्युक्तानि॥ अयमेव हि राजा किं रात्रावित्यादिति। यथाह भ
विष गवान्। यानि तीर्थादिवाक्यानि कर्मादिवाक्यानि च। स्तावकान्येव तानि स्युरज्ञानां मोहकानि च।
भवेन्मोक्षो हि मद्दृष्टेर्नान्यतस्तु कथंचनेति नारदीये॥ अतोऽपरोक्षज्ञानादेव मोक्षः। कर्म तु तत्सा
धनमेव। स यद्वाक्यं प्रमाणं कुरुते। यदुक्तप्रकारेणानुतिष्ठतीत्यर्थः॥ विद्वद्विदुषोः कर्मभेदमाह॥
प्रकृतेरपीति। प्रकृतेर्गुणैरिंद्रियादिभिः प्रकृतिमपेक्ष्य गुणभर्तानि हितानि। तत्संबंधिनिव॥
न हि प्रतिबिंबस्य क्रियाकर्मभेदस्य गुणभेदस्य च तत्त्ववित्। गुणाइंद्रियाणीति। गुणेषु विषयेषु॥
प्रकृतेर्गुणेषु इंद्रियादिषु संमूढाः इंद्रियाभिमानाधिविषयाभिसंगः। गुणकर्मसु विषय
षु कर्मसु च॥ २९

ने

नचतत्रालंबुधिमात्रमुक्तं।।आत्मतृप्तइतिपृथगभिधानात्।।कर्तृशब्दःकालावच्छेदविचार्यप्रसिद्धः।
योगंचेत्सतुनत्र्यादित्याह।।अतोसंप्रज्ञातसमाधावेवचेतत्तोमानवइति।ज्ञानिएवासंप्रज्ञातसमा
धिर्भवतीतिप्रदर्शयतीति।मनुअरबोधइतिधातोःपरमात्मरतिश्चात्रविवक्षिता।।विष्णावेवर
तिर्यस्यक्रियातस्यैवनास्तीतिवचनात्।तस्यकर्मकालेवुत्त्यपमितिकिंचित्सत्यक्तानतत्तरस्य
धिकः।समोवार्थोनास्ति।नचासेध्याद्यकृतोकश्चिद्दोषोस्ति।नचैतदप्रत्यायसर्वभूतेषुकश्चिदर्थव्यपाश्र
नाश्रयः।अर्थयिनदर्शितिनाभवति।सोर्थव्यपाश्रयःज्ञानमात्रेणमत्यवायापिनभवति।तदर्ज
नस्यापिसममितिनतस्यकर्मापदेशोपयोग्यतद्भवति।।इषत्प्रारब्धानर्थसत्वकृतद्भवति।महर्ष्वे
वत्तहत्यादिवत्।यतोसंप्रज्ञातसमाधेनचकार्यमितिवस्तस्मात्सर्वकर्मसमाचर।आचारोप्यस्ती
त्याह।कर्मणैवेति।कर्मणासहकर्मकुर्वन्नेवेत्यर्थः।कर्मकृत्वैवततोज्ञानंप्राप्यतीतिवा।ननुज्ञानंवि
नाप्रसिद्धिर्हितेषांज्ञानितंप्रारतादिषु।तमेवंमाविद्वानमृतइहभवतिइत्यादिश्रुतिभ्यश्च।अ
त्रापिकर्मणांज्ञानसाधनत्वात्केश्च।बुद्धियुक्ताइति।गसंतरेवेनान्यःपंथाइत्यस्यनास्ति।इतरेषां

युत्सकर्मेस्पित आह। श्रेयानिति। बहवः कारणाः संति क्रोधादयः कामश्च तत्र कोबलवानिति पृच्छति।
अथेति। अथकेसर्थांतरं। तयानेव शमागच्छेदिति प्रश्नआपद्य। यस्तुबलवान्सवक्तव्यः सएषकामः
२२ क्रोधोप्येष एव तज्जन्यत्वात्। कामात्क्रोधोभिजायत इति स्मृतेः। यत्रापि गुरुनिंदादिनिमित्तः क्रो
धः तत्रापि भक्तिनिमित्तानिंदा कामनिमित्त एव। ये त्वन्यथा वदंति ते संकरान्न सूक्ष्मं जानंति। उ
क्तं च। कृते कामेन कोपाघाजायते तहि कथं च नेति। महाशनः महद्धि कामभोगी महाब्रह्महत्या
दिकारणत्वात्। महापाप्मा। सर्वपुरार्थविरोधित्वात्। वैरी कथं विरोधीसः इदमनेनावृतं। य
था धूमेनाग्निरावृतः प्रकाशरूपोपि भासम्यगदर्शनाय। तथा परात्मा। यथादर्शो मलेनावृ
तो न्याभिव्यक्तिहेतुर्न भवति। तथांतःकरणं परमात्माभिव्यक्तिहेतुर्न भवति। कामेनावृतं। य
थोल्बेनावृतस्वव्योभवति गर्भः। तथा कामेन जीवः। शाश्वतो जालमपिहितं परमात्मा
परोक्ष्यायन प्रकाशते। कामेनावृतं ज्ञानिनोपि किंचित्स ज्ञानिनः कामरूपेण कामाख्येन।
नित्यवैरिणा दुष्पूरेण दुःखेन हि कामः पूर्यते। नहींद्रियादिपदं सुखेन लभ्यते। यद्यपि इंद्रा

। कुत्रचिदनंतेदुक्तिरिति विशेषः। यस्मिंस्तदुच्यते तत्रैव च निषे
धउक्तः। महतां सर्वविरोधश्चोक्तः पुरस्तात्। अयुक्तिमन्यो युक्ति
मेतेव बलवंति वाक्यानि युक्तयश्चोक्ताः। अन्येषां। न चैषां काचिद्द

।।४९।। संदृश्यमंडल इति च मोक्षधर्मे। नित्यमभितः सर्वतो मुक्तानां। तर्ह्यहं क्रतुरि
त्याद्युक्तत्वमिति अत आह। येपीति। कारणमाह। विधिपूर्वकत्वे अहं हीति॥
फलं विविच्याह। यांतीति। दुर्लभं स्वैः पूजयित्वातु मशाक्यमहत्वादि सार्श
क्याह। यत्रमिति। नत्वपि हि तपत्रादि तस्यापराधत्वाच्चकर्वोराहत्वो। भ
क्त्येवाहं तुष्ट इति भावः। भक्तप्रियं सकललोकेन मस्कृतं चेति भारते
।एवापाने न लोकेस्मिन्पुंसः स्वार्थः परः स्मृतः। एकांतभक्तिर्गोविंदे यत्स
र्वत्रात्मदर्शनं। अतो यत्करोषि तर्हि स्नेहादिमत्वादल्पभक्तस्यापिकर
स्यचित्बहु फलं ददासि विपरीतस्यापि कस्यचिद्विपरीतमित्यत आह
।समोहमिति। तर्हि न भक्तिप्रयोजनमित्यत आह। ये भजंतीति। मयि
ते तेषु चाप्यहमिति। मम ते वशाः तेषामहं वश इति। उक्तं च पैंगिखिले
षु। ये वै भजंते परमं पुमांसं ते तेषां वशाः संतु ते तद्वशगाश्चेति। तद्वशगा एव ते
सर्वदा। तथापि बुद्धिपूर्वकत्वा

स्तक्षिगम्यते।पापविमुक्तैरिति।सा साक्षादीक्षत इति साक्षी।तथाहि वाल्कलशा
खायां।स सा साक्षादिदमद्राक्षीत्तत्साक्षिणः साक्षित्वमिति।शरणमाश्रयः सं
सारभीतस्य परमं यः परायणमिति श्लोकैः।नारायणं महाज्ञेयं विश्वात्मानं
परायणमिति च।संहारकाले प्रकृतौ जगदत्र धीयत इति निधानं।तथा।
ऋग्वेदखिलेषु।अपेस्यमप्ययेमायया विश्वकर्मण्यदो जगन्निहितं प्रभुस्त्र
चक्षुरिति च।सत्कार्यमसत्कारणं।सदभिव्यक्तिरूपत्वात्कार्यमित्युच्य
ते बुधैः।असदव्यक्तरूपत्वात्कारणं चापि शब्दितमिति स्मृतिविधानात्।अ
सच्च सच्चैव च यद्विश्वं यः सदसत्परमिति च भारते।तथापि मद्भजनमेव
देवताभजनद्वारमिति।तच्चैविध्यमित्यादिना।अनन्याः।अनन्यद्दचिंत
यित्वा।तथाहि।गोतमखिलेषु।सर्वं परित्यज्य मनोगतं यद्विना दैवं केव
लं शुध्यमानाः।ये चिंतयंतीह तमेव धीरा अनन्यास्तेदेवमेकं विशंतीति
च।कामं कालेन महता एकांतित्वं समाहितैः।शक्यो द्रष्टुं स भगवान्प्रभा

गीता भाष्य

८

॥५०४ तपोनान्वतमुक्तः एर्वः पूजां गुरूणां सततं करोमि परस्य गुह्यं न च भिन्न एर्वं
गुह्यानि चत्वारि यथा गमं मे। शत्रौ च मित्रे च समोस्मि नित्यं न चापि देवं श
रणं प्रपन्नः। एकांतभावेन ममान्यजस्त्रं मेते विशेषैः परिशुद्धसत्वः॥ कर
स्मात्स्वपरस्पेयमनेत मेननमिति मोक्षधर्मे आचारस्य साधनत्वोक्तेश्च। ज्ञा
नाभावे सम्यक् भक्त्यभावात्। तथा हि गोलमरिबलेषु। विना ज्ञानं कुतो भ
क्तिः कुतो भक्तिं विना तु तत्। भक्तिः परेशानुभवो विरक्तिरन्यत्र चैतत्त्रि
कमेककालमिति भागवते॥ ॥श्रीमद्गीताभाष्ये नवमोध्यायः॥ ५
उपासनार्थं विभूति विशेष कारणत्वं च केषांचिदनेनाध्यायेनाह। प्रीय
माणाय श्रुत्वा संतोषं प्राप्नुवते प्रभवं प्रभावं मदीयं जगदुत्पत्तिं वा। त
दृशत्वाच्च स्य लक्ष्यते। यद्यदस्ति। न हि देवादयो जानंतीति सर्वज्ञत्वात्। अतो
नास्तीति भावः॥ अहमादिर्हीति तत्सर्वेरपि यस्ववशात्कुतस्तस्य जनिरि
ति ज्ञापनार्थं। अहं सर्वस्य जगतः प्रभवः इति चोक्तं उक्तं चैतत्सर्वमन्यत्रा श्रीराम ५
ति

॥५०॥

बुद्धिपूर्वकत्वेन भेदः । उभयत्रादिभरतशिशुपालादिवच्च । तच्चोक्तं तत्रैव । अ
बुद्धिपूर्वो यो वशस्तस्य ध्यानात्तु न दोषो भवनो बुद्धिपूर्वमिति । न भव
त्येव प्रायस्तादृक्को दुराचारः । तथापि बहुपुण्येन यदि कथंचिद्भवति त
र्हि स साधुरेव मंतव्यः । कुतः । क्षिप्रं भवति धर्मात्मा । देवदेवांशादिष्व
चैतद्भवति । उक्तं च शांडिल्यशाखायां । नाविरतो दुश्चरितान्नाभक्तो
वासमाहितः । सम्यक्कर्म कोऽपि वेत्ति कश्चिद्वासुदेवमकाशयः । देवर्षयस्त
द्देशाश्च भवंति कुत्रचिज्ज्ञानतः इति । अतोऽन्यः कश्चिद्भवति चेत्तदांशिक
त्वेन सोऽनुमेयः । साधारपापानां तु सत्संगात् महत्स्वपि कथंचिद्भक्तिर्भवति
। साधारणभक्तिर्वेतरेषां सशठमतिरूपयाति योऽर्थेत दृष्टांतमथ्यचेष्ट
मेवहि नान्यभक्तमेवेहि । श्रीविष्णुपुराणे । साध्वहृद्धानस्य विवर्धमान
विरक्तिमन्यत्र करोति पुंसः इति च । वेदास्वाधीतो मम लोकनाथ तसं

प्राथमिकत्वादेवभवति। गौतमस्त्रिकेषु चोक्तं। स्वायंभुवं रोचिषं चैव तं च तत
था तमं। वेदयः सप्रजावानिति। पूर्वेभ्यो हि उत्तराजायंत इति चैषां प्राधान्य
।अजातेषु चैतेष्वं तापसस्य भगवद्देवावतारत्वादनुक्तिः। तच्च भागवते प्रसि
द्धं। मानसत्वं च सर्वेषां मनूनामुक्तं भागवते। ततो मनून्स सर्जांते मन
सो लोकभावना इति। अन्यपुत्रत्वं चापरिस्यापि पुत्रत्वे शरीरं कद्भवति
।प्रमाणं चान्यवाक्यानुपपत्तिरेव। पूर्व इति विशेषणाच्च तत्सिद्धिः। मत्तो
जाता येषां ते मद्भावाः। एते ब्रह्मणो मानसा जातास्ते मत्त एव जाताः इति भा
वः। सलिचक्षजतः केचिदित्याह। अहमित्यादिना। ब्रह्मपरिपूर्णो। अथ
कस्मादुच्यते परं ब्रह्मेति। बृंहति बृंहयतीति चेति श्रुतिः। बृह बृहि वृद्धावि
ति पठ्यते। परं मम यो महद्ब्रह्मेति च। विविधमासीदिति विभुः। तथा हि॥
पारूप्यशारवायां। विभुः प्रभुः प्रथमं मेह नावत इति। सतलेव व्यापि वहिदि
धोभवति। सोकामयत बहुस्यां प्रजायेयेत्यादेश्च। विभुतया विविधाभूत

पि। कोअद्धा वेद कइह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः। अर्वाग्दे
वा अस्य विसर्जनेनाथा को वेद यत आबभूवेति। न तस्य भावमृषयश्च वेद
या विदुः कुतोन्ये त्वल्पप्रतिप्रमाणा इति च श्रुतेर्वेदखिलेषु। अन्यस्त्वा
र्थीयो मामजमिति नास्य शेषादेव ज्ञायते। अनश्वेष्टयि ता आदिस्त्व
सर्वस्येत्यनादि। अजत्वेन प्रसिद्धेरितरस्यत्वं समर्थयति। बुद्धिरित्यादि
ना। कार्याकार्यविनिश्चयो बुद्धिः ज्ञानं पंडितज्ञाने प्रतीतिर्बुद्धिः कार्या स्तो
कार्यविनिश्चय इति पक्षभिधानं। दम इंद्रियनिग्रहः। शमः परमात्मनिष्ठ
ता। शमो मन्निष्ठता बुद्धिर्दम इंद्रियनिग्रह इति भागवते। तुष्टिरलं
बुद्धिः। अलंबुद्धिस्तथा तुष्टिरित्यभिधानात्। पूर्वे सप्तर्षयः। मरीचिर
त्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः। वसिष्ठश्च महातेजा इति मोक्षधर्मो
क्ताः ते हि सर्वपुराणेषूच्यंते। चत्वारः प्रथमाः स्वायंभुवाद्याः तेषां हिमाः
प्रजाः। न भविष्यतीयि माः प्रजा इति युक्तं। विभागः प्राधान्यप्राथम्यं च।

गीता

॥५२॥ यं। रश्चामश्चेति श्रुसते॥ आछादयति सर्वं वासयति वसति सर्वत्रेति वा

स्तद्वशाद्वार्थ उक्तः। पुरस्तात् छादयामि जगत्सर्वं भूत्वा सूर्य इवांशुभिः

सर्वभूताधिवासश्च वासुदेवस्ततो ह्यहमिति मोक्षधर्मे॥ विशिष्ट

सर्वस्मा। द्दासमंतात्स एवेति व्यासः। स व्यासो विततमं वेविः सोऽधस्तात्स

उत्तरतः स पश्चात्स पूर्वस्मात्स दक्षिणतः स उत्तरत इति। यच्च किंचिज्ज

गत्सर्वं दृश्यते श्रूयतेऽपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः

इति च। मया विना यद्भूतं स्यात्तन्नास्ति। विश्वरूपः अनंतगतिः। अनंतभा

गः। अनंतशुक्लादि मोक्षधर्मे। यद्यद्विभूतिमदिति विस्तरः। विष्ण्वादीनि

तु स्वरूपाण्येव। अन्यानि तु तेजोयुक्तानि तथाच पैंगिरिरहस्ये। विशेष

का रुद्रवैन्येंद्रदेवाजान्याद्या अंशयुता अन्यजीवाः। कृष्णो व्यासो राम

कृष्णौ च रामः कपिलौ यज्ञमनुस्वाः स्वयं स इति। स एवैको भार्गवदाशरथी ॥श्रीराम॥

॥५२॥

भाष्य ९०

योनजायतेर्दयतिचसंसारमितिजनार्दनः। तथाचबाभ्रव्यशाखायां।
सभूतःसजनार्दनइतिसह्यासीत्सनासीत्सोर्दयदिति। विष्णुःसर्वव्यापि
त्वप्रवेशित्वादेः। विष्लृव्याप्तौविशप्रवेशनेइतिचपठंति। गतिश्चस
र्वभूतानांप्रजानांचोपिभारत। व्याप्तामेरोदसीपार्थकांतिश्चाभ्यधि
कामम। अधिभूतनिविष्टश्चतद्विष्णुश्चास्मिभारत। क्रमणाच्चाप्यहं
पार्थविष्णुरित्यभिसंज्ञितइतिमोक्षधर्मे। स्वरवरूपः। पाल्यततेकीय
तेजगदनेनेतिकपिलः। प्रीतिःसुखंकमानंदइत्यभिधानात्। प्राणोब्र
ह्मकंब्रह्मखंब्रह्मेतिच। ऋषिप्रसूतंकपिलंयस्तमग्रेज्ञानैर्बिभर्तिजाय
मानंपश्येत्। सुखानंदात्सालकनाल्लोपनाच्चयंवेदवंकपिलमुदाहरंती
तिबाभ्रव्यशाखायां। आनंदरूपतोहर्षेणलोकरमणताच्चरामः। आनं
दरूपोनिष्परिमाणएवलोकश्चैतस्मात्क्रमतेतेनरामइतिशांडिल्यशाखा

जनमित्यादेः। प्राधान्यं च सिद्धमेकत्र दर्शनात्सर्वत्र भगवद्दर्शनस्य। यो मां प
श्यति सर्वत्रेत्यादेः॥ ॥श्रीमद्गीताभाष्ये दशमोध्यायः॥ ॥ यथाक्र
तेध्यानेशक्यं तथा स्वरूपस्थितिरनेनाध्यायेनोच्यते। प्रभुः समर्थः। ना
स्ति तस्मात्परं भूतं पुरुषाद्वै सनातनादिति मोक्षधर्मे। प्रभुरीशः समर्थ
हि श्चेत्यभिधीतो। हरिः सर्वयज्ञादिभागहारित्वात्। इडोपहूतं गेहेषु हरेर्भा
गं क्रतुषुहं। वर्णो मे हरितः श्रेष्ठस्तस्माद्धरिरिति स्मृतः इति मोक्षधर्मे
सर्वैश्वर्यमियं देवं सर्वैश्वर्यात्मकं। सहस्रशब्दोनन्तवाची। तदपि पाक
शासन विक्रम तुलानेत्यैर्यमेव। एवं हरिकेषु अनन्तशक्तिः परमो अन
न्तवीर्यसीनलते आश्रवतत स्तातोपि इति महातात्पर्याच्च प्राबल्ये। नच प
रिमाणोस्य। किंचित्प्रयोजनं। अनेकशब्दोनंतवाची। अनंतबाहुमिति
च वक्ष्यते। सर्वतः पाणिपादं तदित्यादेश्च। विश्वतश्चक्षुरुत विश्वतो श्रीराम
मुखो विश्वतो बाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति संपतत्रैर्द्यावा ॥५३॥

दिनरूप्रत्यायना

रुष्णा। द्याः स्वेशायुताअन्यजीवा इति गौतमखिलेषु। ऋषयो मनवो देवा
मनुपुत्रा महौजसः। कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः। एते स्वांश
कलाः पुंसः कृष्णस्तु भगवान्स्वयमिति च भागवते। ऋष्यादीनंशायु
क्तत्वेनोक्त्वा मत्स्यादीन्स्वरूपत्वेनाह। तुशब्द एवार्थे। अन्यैस्तु विशेषान
कृत्वाप्यवगतः। अंशत्वं तत्राप्यवगतं। उद्धर्वर्हीलनः केशा विति। मृड
यंतीति च बहुवचनं चायुक्तं। न ह्येतरान्यदृष्टा पूर्वपराम्रश्यते क्रिया
च्यमाना दृष्टा कुत्रचित्। किमिति वृक्ष्यमाणप्राधान्यज्ञापनार्थं नतूक्त
निष्फलत्वज्ञापनाय। तथा सति नोच्यत। अज्ञातत्वेन सर्वविशेषयुक्तं दे
वं परं को विमुच्येत बंधात् इति ऋग्वेदखिलेषु। त्वं तु बहु फलप्राप्तियोग्य
इति तवेति विशेषणं। अन्यैस्तु सर्थत्वेन प्रसिद्धस्यैकत्र किं शब्दः। रागद्वे
षौ यदि स्यातां तपसा किं प्रयोजनं। तावुभौ यदि न स्यातां तपसा किं प्रयो

॥५४५ भवति। असंख्याता ज्ञानकास्तस्य देहाः सर्वपरिमाणविवर्जिताश्चेति
ह्रस्वदर्शिकेषु। यावान्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश
उभे अस्मिन् द्यावापृथिवी अंतरेव समाहिते। उभावग्निश्च वायुश्च
सूर्याचंद्रमसो वुभाविति च। कृष्णस्य गर्भजगतो तिभरावसन्नपा। द
र्ष्णिप्रहार परिरुग्णफणातपत्रमिति भागवते। न चैतदयुक्तं। अचिं
त्यशक्तित्वादीश्वरस्य। अचिंत्याः खलु ये भावा नं तांस्तर्केण योजयेदिति
श्रीविष्णुपुराणे। नैषा तर्केण मतिरापनेयेति श्रुतिः। अतिप्रसंगस्तु
महातात्पर्यवशाद्वाक्यवक्तव्यापनेयः। न हि घटवत्कश्चित्सदार्थो न
दृष्टस्तेनानंता प्रमाण दृष्टः सति निराक्रीयते। केषुचित्सदार्थेषु या
क्यव्यवस्था। अचिंत्यशक्तिभावादंगीक्रीयते। गुणाः श्रुताः सुविरु
द्धाश्च देवे संत्यश्रुता अपि नैवात्र शंका। चिंत्या अचिंत्याश्च तथैव ॥श्रीराम॥

भूमीजनयन्देवएकइतिचऋग्वेदे।विश्वतश्चक्षुरुतविश्वतोमुखोवि
श्वतोहस्तउतविश्वतस्पात्।संबाहुभ्यांनमतिसंपतत्रैर्द्यावाभूमीजन
यन्देवएकइतिचयजुर्वेदे।विश्वशब्दश्चानंतवाची।सर्वंसमस्तंविश्वं
चअनंतंपूर्णमेकंचेतिअभिधानात्।अनंतपारमनंतबाहुमनंत
वक्त्रंपुरुरूपमितिचवाश्वप्रशास्त्रवाक्ये।महत्वायुक्तिस्तुतदा समकेते
नापिभवति।अन्यथाचानादिमस्वब्रह्मणोत्पाद्ययुक्तेःस्यात्।एकत्रत्व
नेतैतानिअस्यरूपाणिइत्यनंतरूपः।अनंतत्वंतुपरिमाणइतिउक्ते
हृभयमपि।परात्परंयन्महतोमहांतंयदेकमव्यक्तमनंतरूपमिति
यजुर्वेदे।अव्यक्तस्यानंतत्वादेवमहतोमहत्वंपरिमेयत्वंसिध्यति।
महांतंचसमावृत्यप्रधानंसमवस्थितं।अनंतस्यानंतस्यांतःसंख्या
२: नैवापिविद्यतेइत्यादिस्कंदपुराणे।तानिचैकानिरूपाण्यनंतानीतिचैकं

द्यावो।मानोमातापृथिवीदुर्मतौधात्।मधुद्यौरस्तुनःपितासादिप्र
योगात्।नतुनियमतोऽभयप्रदं।तत्स्वरूपं।नारदस्यतद्भावात्।के
षांचित्तथादर्शयतिभगवान्।द्विपंक्तिकेचित्तस्वरूपस्यदृष्टोविश्व
तिकश्चिदभ्यसेत्सर्वतृप्तिरितिवारुणशाखायां।नतुसर्वेतंपश्यं।
ति।अदृष्टापितन्निरूप्यमयेद्रष्टुःतथाप्रतिभातितथाप्यगोलम
खिलेषु।दृष्टादेवंमोदमानोऽदृष्टाप्यतद्याद्बिभ्यतेदृष्टवत्ते।पश्य
तितत्तेन्यस्तच्चक्षुर्मुखोस्तुतस्मिन्नेवकेलेमनसोगतत्वादिति।धर्मा
तरज्ञापनार्थमेवकोभवानिति।पृच्छतियथाकश्चित्कंचित्ना
मादिकंजानन्नपिजानातिज्ञानार्थमेवकोभवानितिपृच्छति।य
दितमेवनजानातितर्हिविष्णो।वितिसंबोधनंनस्याद्वालमक्षरमि
तिच।कालशब्दोजगद्बंधनछेदनज्ञानादिसर्वत्रभगवद्धर्मेवाची
।कलबंधनेकलच्छेदनेकलज्ञानेकलकामधेनुरितिचपठंति ५

दोषाश्चतास्यनाशैर्हितयाप्रतीताः। एवं परेन्यत्रशुभाशुभानां कर्माद्या
नस्येति ज्ञानालेश्च तेश्च। उपचरितत्वपरिहाराय नंतध्यममिति।
अन्यथा सत्ताभावेनैव तत्सिद्धेः। विश्वरूपः परिपूर्णरूपः स विश्वरूपो
ननरूपायतोयं सानंतो नहि विनाशो नहि नाशोस्ति तस्येति शांडिल्यश्रु
स्रायो। अनलार्कफतिमिस्फूर्तेमितत्वेशं कामपाकरोति। अप्रमेय
मिति। शशिसूर्यनेत्रमित्यप्यहंक्रतुरित्यादिवदंगजाः सर्वसुरादयो
पितस्मात्तदंगे स्थिषिस्तिःश्च तौस्तरीतिकंगवेदखिलेषु। चंद्रमामन
सोजातश्चक्षोः सूर्यो अजायतेत्यादि च। बहुरूपत्वाद्बह्माश्रयत्वं चले
षांयुक्तो। मातापित्रोरंतरंगः स एकरूपेणचान्यैः सर्वगतः स एक इति
वारुणश्चतेरेकेणैनरूपेणद्यावापृथिव्योरंतरं व्याप्नोति। पश्यमे
पार्थरूपाणीति। बहूनि रूपाणि प्रतिज्ञातानि। मातापितरौ च पृथिवी

रिति कर्णः यदेतत् वक्ष्यमाणं तत् स्थाने युक्तमेवेत्यर्थः। अग्नीषोमाद्यंत
र्यामितया जगत्प्रहर्षणाद्धृषीकेशः। केशत्वं तत्सूत्रनात्तन्नियतत्वाद्ः। प्रमा
णं तु शशिसूर्यौ नेत्रमित्युक्तौ तेऽहृषीकाणामिंद्रियाणामीशत्वाच्चहृषीके
शः। तेषां हृषीकेशः विशेषत ईशत्वं च यः प्राणे तिष्ठन्नित्यादौ सिद्धो नके
हृषीकाणि पतत्वस्य सत्यर्थे रत्स्यादि प्रयोगाच्च। एतेरार्थो मोक्षधर्मसिद्धः।
सूर्याचंद्रमसौ शश्वद्र्केशैर्यं शिसंज्ञितैर्बोधयनुस्थापयंश्चैवज
गदुत्तिष्ठते पृथक्। बोधनात् स्थापनाच्चैव जगतो हर्षसंभवात्। अग्नीषो
मकृतैरेभिः कर्मभिः पांडुनंदन। हृषीकेशोऽहमीशानो वरदो लोक
भावनः इति। कथं स्थानत्वमित्यत आह। कस्मादित्यादिना। पूर्णश्चासावा
त्मा चेति। महात्मा। आत्मशब्दश्चोक्तो भारते। यच्चाप्नोति यदादत्ते य
च्चात्ति विषयानिति। यच्चास्य संततो भावस्तस्मादात्मेति कीर्त्यते। तत्
रं स द्वसतः परमिति भारते। एक एव मेव कारयिता नान्योऽस्त्यथापि
स्वकं रूपं तु भ्रांत प्रतीता। अन्यथा तदपि स्वकमेव प्रमाणानि तूक्ता

असच्च सच्चैव च यद्विश्वं सदसतः पर

प्रसिद्धश्च सशब्दो भवति। नियतं कालपाशेन बद्धं शक्र विकत्थसे। अयं
स पुरुषश्यामो लोकस्य हरति प्रजाः। बध्वातिष्ठति मां रौद्रः पशुं रशनया
यथेति हि मोक्षधर्मे। विष्णुना बद्धो बलिर्वक्ति। विष्णोश्चधीश्वरं चित्तं
धारयन् कालविग्रहे इति भागवते। प्रवृद्धः परिपूर्णो नादिर्वा। ऋग्वेदे च
स संचाम्नी ध्यादिति हि श्रुतिः। एतन्महद्भूतमनंतमिति च। उ विष्णुरसु
तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नामेति च। न तु वर्धनं। नासौज
ज्ञानन मरिष्यति नैधते साविति भागवते। यस्य दिव्यं हि तद्रूपं क्षीयते
न वर्धते न चेति मोक्षधर्मे। न कर्मणेति। तु कर्मणापि निकिमुस्येयमिति।
लोकान् समाहर्तुमिह विशेषेण प्रवृत्तः भीष्मद्रोणादिं श्वत्र इति। अपिशब्द
संबंधः। प्रत्यनीकेषु परस्परतया सर्वे न भविष्यंति। असौ हिरण्यादिभे
देन बहुवचनं तं युक्तं। योस्य सिरः छिन्नं भूमौ पातयति तच्छिरो भेत्स्यती
ति तस्मिन्नुर्बराज्ञा यद्रथोपि विशेषेणोक्तः। सवरायासबासनीशक्ति

णोक्तं। अहंवो मांतदुपश्रियंतिष्ठ धिष्ठतम्राधिवंनेवधामि।यं
कामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां।अहंरुद्रायध
नुरातनोमिब्रह्मद्विषेशरवेहंतवाउ।अहंसुवेपितरमस्यमूर्धन्म
मयोनिरप्स्वांतः समुद्रे।परोदिवापरएना पृथिव्येतावतिमहि
नासंबभूवेत्यादिच।येयाजुष्टं ऋषिभिर्भवति देवीत्वयाब्रह्मो
गतश्रीरत्नवयेतिच।इतिशंकाकेस्यचिद्भवति।अतोज्ञानेन्नो
पिसूक्ष्मयुक्तिज्ञानार्थं पृच्छति।एवंशब्देनदृष्टफलरूपमत्कर्म
कृदित्यादिप्रकारस्य परामृश्यते।अव्यक्तं प्रकृतिः।महतःपरम
व्यक्तमितिप्रयोगात्।यच्चत्रिगुणमव्यक्तं नित्यंसदसदात्मकं।
प्रधानंप्रकृतिंप्राहुरविशेषंविशेषवदितिभागवते।अक्षरंतद।अक्ष
रात्सरतःपरइतिश्रुतेः।परंतुब्रह्मभगवतोन्यत्।आनंदमानंदमयोवसा

नहि

२७॥ स्तो। तस्यो स्कपर्णी वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयं। चतुः शिखंडा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ॥ १
निपुरस्तात्॥ ॥श्रीमद्गीताभाष्ये सप्तदशोऽध्यायः॥ ॥अव्यक्तोपास
नाद्भगवदुपासनस्योत्तमत्वं प्रदर्श्य तस्यमत्वं तदुपायं दर्शयत्यस्मिन्न
ध्याये॥ तदुपासनमपि मोक्षसाधनं प्रतीयते। ये यं च सानाऽमृतत्वमा
यन्नभवंतिसत्सासमिथ्यामितरैरिति। अनाद्यनंतं महतः परं ध्रुवं नि
चाय्य तं मृत्युमुखात्प्रमुच्यत इति च। अव्यक्तं च महतः परं। महतः पर
मव्यक्तमित्यव्यक्त परामर्शोपपत्तेः। उपास्यतां श्रियमव्यक्तसंज्ञां भ
क्त्या मर्त्यो मुच्यते सर्वबंधैरिति सामवेदे अग्निवेश्यशाखायां। मह
त्यमाहात्म्यं तस्याः वेदेषूच्यते। चतुष्कपर्दी युवतिः सुपेशा घृतप्र
तीका वयुना निवस्त इति च। अहं रुद्रेभिर्वसुभिश्चराम्यहमादि
त्यैरुत विश्वदेवैः॥ इत्यारभ्य अहं राष्ट्री संगमनी वसूनां चिकितुषी
प्रथमा यज्ञियानां॥ तां मा देवा व्यदधुः पुरुत्राभूरिस्थात्रांभूर्या
र्यावेशयंती। मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईंशृ

द्वे। एवं तु तदुपासका एवोत्तमाः। इतरेषां तु किं फलमित्यत आह। ये त्विया
दिना। अनि र्देश्यत्वं चोक्तं भागवते मायायां। अप्रतर्क्याद निर्देश्यादि
त्येकेष्वपि निश्चयात् इति। ईश्वरस्तु देवशब्देनोक्तः। दैवमन्ये परे इत्य
त्र। उक्तं च सामवेदे काषायणश्रुतौ। नासदासीन्नो सदासीत्तदानीं
मिति। न महाभूतं नोपभूतं तदाशीर्भिरित्यारभ्य तम आसीत्तमसा
गूढमग्र इति। तमोऽव्यक्तमजरमनिर्देश्यमेषा ह्येव प्रकृतिरिति
सर्वगा। चिंत्यादिलक्षणा च सा हि तथा हि। मोक्षधर्मे। नारायणगुणाश्र
यादजरादतीन्द्रियादग्राह्यादसंभवतः। असत्वादहिंस्राद्वाभ्यां तद्द्वि
तीयप्रकृतिविशेषाद वैराग्याद क्षयात्। अमरादक्षरादमूर्तिलिः सर्व
स्याः सर्वकर्तुः शाश्वततमसः इति। आसीदिदं तमोभूतमप्रज्ञातमल
क्षणं। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः इति मानवे। कूटस्थो
क्षर उच्यते इति वक्ष्यते। कूटे आकाशे स्थिता कूटस्था। आकाशे संस्थि

हृशे।

नेसर्वलोके ब्रह्मणि वासुदेवे इति हि भागवते। रूपं चैतेषां धिष्ठं पुरस्ता
त्‌ उपासनेन तत्पैव कार्यं। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्‌।
इत्याद्युक्तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यत इति
श्रुत्युक्ताः। आदित्यवर्णत्वादिकं च नय थोपचारत्वेनांगीकार्यं। तथा च
सामवेदे सौकरायणश्रुतिः। स्थाणुर्ह वै प्राजापत्यः स प्रजापतिं पित
रमित्यो वाच। मुमुक्षुभिरायुष्मिः पूतपापैः किं मुह वै तारकं तारं वाच्यं ध्यानं
च तस्यास्वरूपं च। कथं स्यात्‌ ध्येयश्च कः पुरुषो लोमपाद इति तं होवाचै
षा वै विष्णुस्तारको लोमपादो ध्यानं च तस्य स्वरूपं चैव दामिसोनंतशी
र्षा बहुवर्णः स्ववर्णः ध्येयः सर्वेषां हि वादित्यवर्णः। श्यामोथ वा हृदये
सोष्टबाहुरनंतवीर्योनंतबलः पुराण इति। अरूपत्वादेव गतिरुक्ता। पु
रुषभेदस्त्वप्रत्यक्षादेः प्रतीयते। तं पर्युपासते तेषामप्यक्षर मव्यक्त मित्या

॥५९॥ यासेनयदिभगवतेउपास्तेतुनेनवातदाभगवदापरोऽस्यमेवभवती
तिद्वितीयमधिकं।इंद्रियसंयमनाद्युनमंवेरूपासकस्यापिदे
वीनातिप्रसादमेतीति।देवस्तुतानिसोपनानिसक्तिमतःस्वयमे
वप्रयत्नेनददातीतिसौकर्यमितिसक्तानांभगवदुपासनेतरस्तैत्र मि
कुशोधिकतरः।तदेतत्सर्वंपर्युपासतेसन्नियम्याधिकतरइतिप
रिसंतशब्दैःप्रतीयतेसामवेदमाधुछंदशाखायांचोक्तं।भक्ताश्चा
तीवविष्णौअतीवजितेंद्रियाःसम्यगाचारयुक्ताः।उपासतेतांसम
बुध्यपश्चतेषांदेवीदृश्यतेनेतरेषां।दृष्टाचसाभक्तिमतेवविष्णो
दत्तोपास्तोसर्वविघ्नान्घिनत्ति।उपास्यतंवासुदेवंविदित्वाततः
स्तत्तःशांतिमसंतमेतीति।उक्तंचसामवेदे।अथास्यशाखायां।
प्रसन्नोभविताहेवःसोव्यक्तेनसहैवतु।यावत्तावत्प्रसादोहितावं
तेवत्रसेरायः

तान्हं तेषां ततः कूटस्थिता मतेति ऋग्वेदखिलेषु। सा सर्वगा निश्चला लो
कयोनिः सा चाक्षरा लोकगा विरजस्का इति सामवेदगोपवनशाखा
यां। कथं तर्हि तदुपासकानां मुक्तत्वमित्यत आह। क्लेश इति। अ
व्यक्ता गतिः दुःखं देहवद्भिरवाप्यते गतिर्मार्गः। अव्यक्तोपासनद्वारकोप
प्राप्तिमार्गो दुःखप्राप्य इत्यर्थः। अतिशयोपासनं सर्वेंद्रिया।
तिनियमन सर्वसमबुद्धिसर्वभूतहितेरतत्वेतिसदाचारस
म्यक् विष्णुभक्त्यादिसाधनसंधर्मनते नाव्यक्तापरोक्ष्यं तद्वते च
न विष्णुप्रसादः। सत्यपि तस्मिन्नेन भगवदुपासनमृते न लब्धं तं मोक्षः
विनाव्यक्तोपासनं भवसेर। भगवदुपासकानां मोक्ष इति क्लेशोयं मा
र्ग इति भावः। तथाप्यपरोक्षीकृताव्यक्तानां सुकरं भगवदुपासनमि
सेतानवप्रयोजनं। तत्रापि योव्यक्तापरोक्ष्ये प्रयासः तावता प्र

॥ ६०५ सांख्यप्रसिधंप्रधानंनिषिध्यवैदिकमव्यक्तमेवोक्तं।तथाचसौकरा
यणश्रुतिः शरीररूपिकाः शरीरस्यविष्णोर्यतःपिपासाजगतः इ
दैश्वर्य ति स्कन्नतानांक्षिप्रमहं देवीदृष्टातीतिनवैदेरति च विशेषः।सु
वर्णवर्णांपद्मकरांचदेवींसर्वेश्वरींव्यासजहुंचबुध्वा।सैवेतिवि
स्कन्नतानांतुसौमोन्सहाभूतिंश्रीस्तुदधानदेवरस्येवेदविशेषु
मदुपासकानांभक्तानांनकश्चिक्लेशइतिदर्शयति।येत्विसर्वद
ना।उक्तंचसौकरायणश्रुतौ।उपासितेयपुरुषंरास्कदेवमव्यक्तो
देतीप्सितंकिंतुतेषामिति।तेषामेकांपतिनःश्रेष्ठास्तेचैवानन्यद
वताःयहमेवगतिस्तेषांनिराशीःकर्मकारिणामितिचमोक्षध
र्मे।अज्ञानपूर्वादभ्यासात्ज्ञानमेवविशिष्यते।ज्ञानमात्रात्सहज्ञा
नंतथाचसामवेदअनभिन्मानशाखायां।अधिकंकेवलाभ्यासा

नतत्प्रसादमात्रेणप्रीयतेपरमेश्वरः।तस्मिन्प्रसंन्नेसर्वस्यप्रीतिस्तु
भवतिध्रुवं।यद्यप्युपासनाधिक्यंतथापिगुणदोहिसः।मुक्तिदस्तु
१ सँवैकेवलाव्यक्तादिस्तुकश्चनेति।ममानुभावमिष्यंतोयदंतेपरमा धं
त्मनइतिचमोक्षधर्मेष्ववचनं॥धर्मनित्येमहाबुधौब्रह्मण्येस
त्यवादिनी।प्रश्रितेदानशीलेचसदैवक्षितिदैवसाम्यहमितिचाम
हतःपरंतुब्रह्मैव।तथाहि।भगवतासयुक्तिकमभिहितं।वदती
तिचेन्नप्राज्ञोहि।त्रयाणामेवचैवमुपन्यासःप्रश्नश्चेत्यादि।त
मितिपुंलिंगाच्चैतत्सिद्धिः।महतःपरत्वंत्वव्यक्तेपरस्याप्यत्येवाल
भ्याचाग्निवैश्यशाखायां।अनाद्यनंतंमहतःपरंध्रुवमिति।परोहि
देवःपुरुहूतोमहत्तमस्तीति।नचाव्यक्तेस्वरूपेभगवतानिषि
द्धं।भारतादौसाधितत्वात्।शरीररूपकविन्यस्तगृहीतेरित्यादौ

रमेव मुक्तिर्भवति। भवति च ध्यानयुक्तात्। केवलस्तामस्तुतिरेव
मपि भवति। यथानेन युक्तो ज्ञेतानोन्यथेस्तुत्ये। सर्वारंभपरित्या
गी शुभाशुभपरित्यागीत्यादेः। सामान्यविशेषव्याख्यानव्याख्येय
भावेनापुनरुक्तिः। हर्षादिभिर्युक्त इत्युक्ते कांचित्कमपि भयती दा
ति यो न हृष्यति इत्यादि। उपचारपरिहारार्थं पूर्वमाधिक्यज्ञाप
नाय भक्तस्याभ्यासः। ये तु सर्वकर्माणीत्यादेः प्रपंच एषः। पिंडितं तो
पसंहरति। ये तु धर्म्यामृतमिति। धर्मो विष्णुस्तद्विषयं धर्म्यं
मस्यादि+संसारनाशकं चेति धर्म्यामृतमिति। अथास्ति कंयत्र
भामोस्तिक्यामुन्यते इति हृदभिधानं। तदृधानाः श्रद्दधानाः॥ ५
श्रीमद्गीताभाष्ये द्वादशोध्यायः॥ ५ पूर्वोक्तज्ञानज्ञेयप्रसन्न
पुरुषान्पिंडीकृत्य विविच्य प्रदर्शयत्यनेनाध्यायेन। यद्विकारि

ज्ञानं तत्सहितं ततः। ध्यानं ततश्चापरोक्ष्यं ततः शांतिर्भविष्यतीति।
ध्यानात्केवलफलत्यागरति सा स्तुतिः। अन्यथा कथमसमर्थोसीत्यु
च्यते। तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यत इति चोक्तं॥
ध्या सर्वाधिकं ज्ञानमुदाहरंति॥ ध्यानाधिके ज्ञानभक्ती परात्मनः क
र्मफलत्यागः स्यात्समर्थो विरागः। त्यागश्च न ज्ञानकलाफलाहीं इति
प्रतीयते काषायणशाखायां। वाक्यसाम्येपि असमर्थविषय
त्वोक्तेस्तात्पर्याभाव इतरत्र प्रतीयते। ध्यानादिप्राप्तिकारणत्वा
च्च त्यागस्तुतिर्युक्ता। केवलध्यानात्सफलत्यागयुक्तं ध्यानमधिकं
ध्यानस्य फलत्यागए स्तोत्रोक्तः। अन्यथा कथं त्यागाच्छांतिरनंतरमि
त्युच्यते। कथं च ध्यानादाधिक्यं। तथा च गोपवनशाखायां। ध्या
नात्तु केवलाच्च त्यागयुक्तं तदधिकं भवेदिति। न हि त्यागमात्रानंत

रीतभावात्।ज्ञानसाधनं प्रथमं तदुक्तं।बहुत्वात्साधनाद्युपयोगास्स
भावः।यतश्चयदिति वक्तुं प्रकृतिविकारपुरुषान्संक्षिप्याह।गु
णाः सत्वादयः तेषामल्पाल्पो विशेषो लय्यो तु।सर्ग इति विकाराः पृ
थगुक्ताः कार्याकार्यगुणास्तिस्रः यतः स्वल्पोद्भवो जनाविति मा
धुवदस्यशाखायां।कार्यं शरीरं शरीरं कार्यमुच्यत इत्यभिधान
।कारणानीन्द्रियाणि भोगोनुभवः।सहि चिद्रूपत्वादनुभवमिति
प्रकृतिश्च जडत्वात्सारिणी भिन्नी।कार्यकारणकर्तृत्वे कारणं प्र
कृतिं विदुः।भोक्तृत्वे सर्वदुःखानां पुरुषं प्रकृतेः परमिति भाग
वते।पल्लभ्यं यदित्याह। उपद्रष्टेति।अनुमंता।अन्यच्च विशे
षतो निरूपकः।पुरुषः सुखदुःखानामिति।जीव उक्तः पुरुष प्रकृ
तिश्चेति।जीवेश्वरौ सहैवोच्येते।अन्यत्र महावाक्ये विरोधः।उक्तं

येनविकारेणयुक्तंयत्तंतस्यचयत्स्वयतोयातिप्रवर्त्ततेसचप्रवर्त्तकः।यतश्च
यदितस्मात्प्रवर्त्ततेक्षेत्रमितिविवचनं।सचयइतिस्वरूपमात्रं।अस्यसत्त्रा
णिशारीरकइच्छादयोविकाराः।सचयोयत्प्रभावश्चेतिवक्तुंतज्ज्ञानसा
धनान्याह।अमानित्वमित्यादिना।आत्मोऽल्पत्वंज्ञात्वापिमहत्त्वप्रद
र्शनंदंभः।ज्ञात्वापिस्वात्मनोऽल्पत्वंदंभोमाहात्म्यप्रभावनमितिप्रसि
धानं।आर्जवंमनोवाक्कायकर्मणाममवैपरीत्यं।सक्तिःस्नेहःसर्वथा
तिपक्षोऽभिष्वंगः।स्नेहःसक्तिःसर्वातिपृक्तोऽभिष्वंगउच्यते।तदुत्पत्त्यभिधा
नं।तत्त्वज्ञानार्थदर्शनं।अपरोक्षज्ञानार्थंशास्त्रार्थदर्शनंपरब्रह्मेति।
सचयइतिप्रतिज्ञातमुच्यते।अन्यचयत्प्रभावइति।आदिमद्देहादिव
र्जितमनादिमत्।अन्यथानादित्वेनस्यात्।सर्वेंद्रियाणिगुणाश्चयोभा
सयतीतिसर्वेंद्रियगुणाभासं।इंद्रियवर्जितत्वाद्यर्थउक्तः।पुरस्तात्।किंचा

तो

गीता ॥६३५ भाष्य

जनमेजयउवाच।

स्त्रैवाहने तद्विरुद्धा वाचो नेतद्विरुद्धा युक्तयः इति ह प्रजापतिरुवाचेति
।तद्विरुद्धं च जीवस्य साम्यं। आभासएवचेति चोक्तं। बहवः पुरुषाब्रह्म
न्नुतो हीरक्रुरवत्। कोह्यत्र पुरुषश्रेष्ठस्तं भवान्वक्तुमर्हति। वैशंपाय
नउवाच। नैतदिच्छंति पुरुषमेकं कुरुकुलोद्वह बहूनां पुरुषाणां य
थैका योनिरुच्यते। तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकमि
ति मोक्षधर्मे। न चैतत्सर्वं स्वप्नेंद्रजालवत्। वेधस्त्याच्चन स्वप्नादिवत्।
इति भगवद्वचनं। न च स्वप्नबहुत्वे एकजीवकल्पितत्वे मानं पश्यामः। विप
र्यये मानोक्ता द्वितीये। उक्तं चायास्यशाखायां। स्वप्नो हवाअयं चेचल
त्वान्न चेस्वप्ना नेहि विच्छेद एतत्स्वतीतिनायं दोषः। न हीश्वरस्य जीवैक्य हि
मुच्यते। जीवस्य हीश्वरैक्यमिति ध्येयं। तदपिन निरूपाधिकं। अतो
न तस्मति बिंबत्वे विरोधैक्यं। तथा च माधुच्छंदसश्रुतिः। ऐक्यं वा
पि प्रतिबिंबेन विष्णोर्जीवस्यैतदृषयो वदंतीति। अहं ग्रहोपासने

श्रीराम
६३५

हिमहात्तास्यं। तथाहि। सौकरायणश्रुतिः। अवाच्योत्कर्षे महत्वात्सैर्वेवा
चोसर्वेन्यायानां च महतः परत्वे विश्णोरनंतस्य परात्परस्य तच्चापि हि सत्ये
वा न चात्र शंका। अतो विरुद्धं तु यदत्र मानं मदत्स जादावथवापि यु
क्तिः। न तत्प्रमाणं कवयो वदंति न्वापि युक्तिर्हि सुनिश्चितिर्हि दृष्टिरिति।।
श्रि अतो युक्तिरपि ह्येतदपलापो युक्तः। अतो मया युक्त्या विद्यमानत्वादि
कल्पयंति। सोप्याभासरूपेति स देव माहात्म्यं वेदे स्व्यन इति सिद्ध्य
ति। अवांतरं च तात्पर्यं तत्रास्ति। उक्तं च तत्रैव। अवांतरं तत्परत्वं च स
तो महत्त्वाप्येकत्वात्तुल्ययोरनंतरइति। श्यामत्वाद्यभिधानाच्चायुक्तं पुरु
षमतिकल्पितयुक्त्यादेरभासत्वं। अज्ञानसंभवात्। न तु स्वतः प्रमा
णस्य वेदस्याभासत्वं प्रदर्शनं च संभवत्येव। पुंसां बहूनां मप्यज्ञाना
त्। न हि अस्मदनधीतत्वात्कदेविपर्ययोपिस्यादि ति न वाच्यं। यत
अ

अर्हं ३४ प्रातिबिंबेन सोऽस्मीत्यस्येति

ला

वफलाधिक्यमाग्निवेश्यफलि सिध्यं। प्रहोपासकेनस्य साम्यमभ्याशोहवाअ
श्रुतेनात्र शंकेति। तदीयोहमिति ज्ञानेन महं ग्रह इतीरित इति च वामने। त
हृशांतु सोऽस्मीति भत्सेरेवन तु स्वत इति च। प्रातिबिंबेन सोऽस्मीत्येवं
रूपास्यः परमः पुमान्स इति प्रातिबिं। बेन साम्यमेव। सारूप्येन वेदोक
भग यत्स्वरूपज्ञानेन। कर्मिणामपि फलत्वात् ज्ञात्वा ध्यात्वा हृष्टिः। श्रावकाणां
च ज्ञात्वा ध्यात्वा ध्यातानां सारूप्यानां च ध्यात्वा। तथा चगोपवनस्फलिः। कर्म
कृत्यापि तद्धृत्वा ज्ञात्वा ध्यात्वानु पश्यति। श्रानको पितथा ज्ञात्वा ध्यात्वा
न्यापि पश्यति। अन्यथा तस्य दृष्टिर्हि कथंचिन्नोपकायतेति अन्य इत्य
शकानां मनुपायं दर्शयति। पुनश्च प्रकृति पुरुषेश्वरस्वरूपात्साम्यापि दर्शि
यितुमाह। यावदित्यादिना। श्रीलानं वाकलोरं पश्यति। सपश्यति। एक
स्य मनेकस्मिन्ने वविद्धो स्थितं। ततएव च निष्ठो विस्तारं नन व्यपादिस्त
स्यस्याह। अनादित्वादिति। सादिहि प्रायो व्याप्यगुणादिकं चन करोतीस

भावेना। तथा ह्यात्मस्वरूपज्ञानावच्छेदात् अर्हं ४

अतो नप्रवृत्तमित्या

भाष्य

गीता

॥ ९८ ॥ देरर्थ उक्तः । पुरस्तात् । न लौकिकक्रियादिस्तस्येत्याद्यवदिति । भक्तेभ्यः प्र
कृतेभ्यश्च मोक्षसाधनमनात्मानित्यादिकं ॥ ॥ श्रीमद्गीताभाष्ये त्रयोदशोऽ
ध्यायः ॥ ॥ साधनं प्राधान्येनोक्तराध्याये वक्ति । महद्ब्रह्म प्रकृतिः सा च
श्रीभूदुर्गेति भिन्ना । उमा सरस्वत्याद्यास्तदंशयुक्ताः । अन्यजीवाः । त
था च कौषायणश्रुतिः । श्रीभूदुर्गा महती तिस्रो माया सा लोकसंसृतिर्जग
तां बंधिका च । उमा नाना गांधा अन्यजीनास्तदंशास्तदा मनसा सर्वे नेदषुगी
ता इति । मम योनिः गर्भाधानार्थ योनिर्महालक्ष्मीरोषाद । तथा हि सा
मवे देशाकेरास्यश्चक्तो । विष्णोर्योनिर्गर्भसंधारणार्था तापा -- सर्वदुःखे महा
विहीना । तथाप्यात्मानं दुःखिवन्मोहनार्थं प्रदर्शयतीति साहाविष्णुनासहै इति
। अतो सीतादुःखादिकं सर्वमेषा प्रदर्शनमेव । तथा च कूर्मपुराणे । न
चेयं भूः । तथा च सीकरायणश्रुतिः । अन्याभूर्भुरियं तस्य च्छायाभूता व
मा साहिभूतैकयोनिरिति । अवाप्य स्वेच्छया दोस्य जगतां प्रपितामहीति श्रीराम ॥
॥ ९८ ॥

१६५॥ सात्त्विकः पुरुषव्याघ्रो भवेन्मोक्षार्थनिश्चित इति। तत्त्यक्त्वार्थ उक्तः पुरस्तात्। ब्रह्मवृक्षः
स्तुतिवद्भगवत्प्रियत्वं। ब्रह्मवृक्षः न तु तावत्स्थिरत्वं किंतु प्रियत्वमात्रं। बंधो वापि तु मु
क्तो वा न रमावस्थियो हरेरिति पाद्मे। ब्रह्मायं वृक्षो वा ययावब्रह्मणः मायायाः॥ ॥चतुर्द
शोध्यायः॥ ॥संसारस्वरूपं तद्दत्यमोपायं विज्ञानान्यस्मिन्नध्याये दर्शयति॥
ऊर्ध्वो विष्णुः ऊर्ध्वपवित्रो वाजिनीवस्वमृतमस्मि द्रविणं सुवर्चसमिति हि श्रु
तिः ऊर्ध्व उत्तमः सर्वतः। अधोनिकृष्टं। शाखाभूतानि। श्वोप्येकप्रकारेण न तिष्ठती
त्यश्वत्थः। तथापि न प्रवाहव्ययः। पूर्वब्रह्मकाले यथा स्थितिस्तथा सर्वत्रापीत्यव्यय
त्वं। फले कारणत्वात् छंदांसि पत्रत्वं। न हि कदाचिदपि अजाते पर्णे फलोत्पत्तिः। अ
व्यक्ते पि सूक्ष्मरूपेण संति शरीरादौ च। भूतानीत्यधश्चोर्ध्वं च प्रसृताः गुणैः सत्वा
दिभिः। प्रतीतिमात्रेण सुखत्वात् प्रवालाः विषयाः। मूलानि श्रृंगवद्रूपादीनि। भगवा
नपि कर्मानुबंधेन फलं ददाति। तथा च भालवेयशाखायां। ब्रह्म वा अस्य पृथङ्मू
लं प्रकृतिः सम्मूलसत्वादयोर्वाचीनमूलं भूतानि शाखा छंदांसि पत्राणि देवेन्द्र

अनभिम्लानस्मृतिः।मत्स्यपुराणात्क्रमपिसेव्युपेयेव।महद्ब्रह्मशब्दवाच्यापिप्रकृतिरेव।महतीप्रय
णीहेतुप्रकृतिश्चमहेश्वरइतितन्त्रेण।बंधप्रकारंदर्शयतिसाधनानुष्ठानाय।सत्त्वमित्या
दिना।तृष्णासंगयोःसमुद्भवं।तयोःकारणं।अज्ञानंजायतेयतस्तदज्ञानजं।प्रमादमोहौ
तमसइतिवाक्यशेषात्।रजसस्तुफलंदुःखमिति।अल्पसुखंदुःखं।तथाहि।शार्करा
क्षशाखीयाः।रजसोह्येवजायतेमात्रयासुखदुःखेतस्मात्तान्सुखिनोदुःखिनइत्याचक्ष
तइति।अन्यथादुःखस्यातिक्लिष्टत्वात्तमोधिकत्वंरजसोनस्यात्।परिणामिकर्तॄन्।
गुणेभ्योऽन्यंनपश्यति।अन्यथायदापश्यःपश्यतेरुक्मवर्णंकर्तारमीशंपुरुषंब्रह्मयो
निमितिश्रुतिविरोधः।नाहंकर्तानकर्तालिंकर्तायस्तुसदाप्रभुरितिमोक्षधर्मे।प्रा
योनद्वेष्टिनकांक्षति।तथाहिसामवेदेभाल्लवेयशाखीयाः।रजस्तमःसत्त्वगुणानुवृत्ता
न्यायोनचद्वेष्टिनकांक्षतेचापिकोपेत।तथापिसूक्ष्मंसत्त्वगुणंचकांक्षेद्यदिप्रविष्टंसुत
मश्चभाह्वेयाइति।नदेवाऋषयश्चैवसत्त्वस्यानुपसत्तम।नीनाःसत्त्वेनसूक्ष्मे
णतत्त्वावैकारिकामताः।कथंवैकारिकोऽगच्छत्सुरूपंपुरुषोत्तममितिमोक्षधर्मे।।

रीरमाप्नोति उत्क्रामति च जीवः तदेश्वरः एतानि गृहीत्वा संयाति। यत्र यत्रैव संयुक्तो धाता
गर्भं पुनः पुनः। तत्र तत्रैव वसति यो तिन यत्र स्वयमिच्छतीति हि मोक्षधर्मे। भावाभावाव
पिज्ञानं च गरीयो। जानामि श्रेयो न च तत्करोमि। आशास्य हर्म्यास्य संहसंकुर्वन्यथानि
युक्तोस्मि तथा वहामीति च। हत्वा जित्वा च मघवन्नयः कश्चित्पुरुषायेत। अकृतीतेव
भवति कृतीतेव करोति तदिति च। तद्यथाहानः सुसमाहितम् उत्सर्जद्यायादेवमेवा
यं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीति च श्रुतिः। वाङ्मनसि संप
द्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति च। गंधानिव सूक्ष्माणि
। भोगोस्यापि हि साधितः पुरस्तात्। इंद्रियद्वारापि स भुंक्ते। तद्यद्रमे वीणायां गायंति
एतं गायंतीति च श्रुतिः। गुणान्वितं मे वा भुंक्ते। न ह वै देवान्पापं गच्छतीति श्रुतिः
तर्हि किमिति न दृश्यत इत्यत आह। उत्क्रामंतमित्यादिना। ~~गांभूमिं~~। यतंतो ज्ञानं
प्राप्य। अकृतात्मानः। अशुद्धबुद्धयः। पूर्वोक्तमेव ज्ञानं प्रपंचयति। यदादित्यग
तमित्यादिना। गां भूमिं। वेदनिर्णयात्मिका मीमांसा वेदांतः। तथा च सामवेदे प्राची
न शालश्रुतिः

तीर्यक्चश्वशाखाः प्रत्तेभ्यो हि फलं जायते। मात्राः शिफाः मुक्तिः फलममुक्तिः फलं कोशो
रसोऽमोक्षो रसः। अव्यक्ते च शाखा व्यक्ते च शाखा व्यक्ते च मूलमव्यक्ते च मूलं। एषोऽश्व
त्थो गुणालोलपत्रो न स्थीयते न स्थीयते न ह्येष कदाचनान्यथा जायते नान्यथा जाय
त इति। यथास्थितस्तथा नोपलभ्यते। आत्मादिर्विष्णुः। त्वमादिरंतो जगतोस्य म
ध्यमिति भागवते। अनाद्यनंतपरमं न देवा न ऋषयो विदुरिति मोक्षधर्मे। अ
संगशस्त्रेण संगराहित्यसहितेन ज्ञानेन। ज्ञानासिनोपासनया सितेनेति भागवते
छेदश्च विमर्शएव। ततश्च तस्यैवावंधकं भवति। तथा हि मूलस्यंअस्य प्रलीयते।
तच्चोक्तं तच्छलावेव। विमर्शोह्यस्य छेदस्तेन भवभाति बध्नाति चान्यानिति। तदर्थ
चतमेव प्रपद्ये। प्रपद्येत। तच्चोक्तं तत्रैव। तं वै प्रपद्येत यं वै प्रपद्य न शोचति न हृष्यति
न जायते न म्रीयते तद्ब्रह्ममूलं तच्छिंस्करिति। नारायणेन दृष्टश्च प्रतिबुद्धोऽभवेस्मा
निति मोक्षधर्मे। छेदनोपायो व्याकोक्षितः। न च भगवतोन्यः शरण्योस्ति। सा घर्मां
तरमाह। निर्मानेति। स्वरूपं कथयति। न तदित्यादिना। कर्षतीत्यत्र च्छायाजीवस्यास्या
तत्र्यं प्रतीतं तं निवारयति। शरीरमित्यादिना। यद्यदा श

दैवीसंपदमभिजातः प्रतिजातः।जगतः सत्यं प्रतिष्ठा ईश्वरस्य।विष्णुस्तद्दे
वरीसेनेत्याहुः तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष
सत्यमितिश्रुतिः।द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च स्थितं चास्थितं
च सच्च त्यच्चेति।तस्योपनिषत्सत्यस्य सत्यमिति।एषह्येतसाधयति
पाययति चेति।प्राचीनशालश्रुतिः।परस्परसंभवाह्युचः।अन्नाद्भ
वंतिभूतानीत्यादिना।दुःपूरो हि कामः।पाताल इव दुःपूरोमां हिकु
शयते से देति मोक्षधर्मे।मामात्मपरदेहेष्विति।न कस्यचिद्विष्णुः का
रयिता यदि स्यान्मामिदानीं कारयतीत्यादि।ईश्वरो यदि सर्वकारकः
कारयीत मामद्येति वादिने श्रेयो हसदाध्यायास्यसीति लिसाम वेद
यास्कश्रुतिः॥ ॥षोडशोध्यायः॥ ॥गुणभेदान्प्रपंचयत्यनेनाध्यायेन
।शास्त्रविधिमुत्सृज्याज्ञात्वैव।वेदः कृत्स्नोधिगंतव्यः सरहस्यो द्विजन्मनेति॥

सवेशांतरूस्तकाठरूसद्येवयुक्तिस्तुचरूस्तकालरूदिति।क्षरभूतानि
ब्रह्मादीनि।कूटस्थाप्रकृतिः॥तथाचेशार्करासश्रुतिः।प्रजापतिप्रमुखाः
सर्वेजीवाः क्षरोऽक्षरः।पुरुषोवैप्रधानंतदुत्तमंचान्यमुदाहरंति।जा
लाजालंमातरिश्वानमेकमिति॥ ॥श्रीमद्गीताभाष्ये पंचदशोऽध्यायः
॥ ॥पुमर्थसाधनविरोधीन्यनेनाध्यायेनदर्शयति।तपोब्रह्मचर्या
दिः।ब्रह्मचर्यादिकंतपउच्यतेरुत्सन्निधानात्।पैशुनं।परोपद्रवनि
मित्तदोषाणांराजादेःकथनं।परोपद्रवहेतूनांदोषाणांपैशुनंवचः॥
राजादेस्तुमद्गद्गीतेरुद्दृष्टिर्दर्पउच्यतेरुत्सन्निधानात्।लौल्यंरागः
।रागोलौल्यंतथासक्तिरित्सन्निधानात्।अचापलंस्थैर्यं।चपलश्चं
चलस्थिररुत्सन्निधानात्।क्षमालुक्रोधाभावेनसहापकर्तुरनप
कृतिः।अक्रोधोदोषप्रद्युम्नोः क्षमावान्सनिगद्यतरुत्सन्निधानात्

११६८५ यं। अंकुरः सौम्यउच्यतइत्यभिधानं। मौनं मननशीलत्वं। बाल्यं च पांडित्यं
च निर्विद्याथमुनिरितिश्रुतिः। एतेन हीदं सर्वं मतं। यस्तेन हीदं सर्वं मतं
तस्मान्मुनिस्तस्मान्मुनिरित्साचक्षत इति हि भाल्लवेयश्रुतिः। कायं चा
न्यथा मात्र संतपः स्यात्। पुनश्च कर्मादीति केत्वन्यतां विधानार्थं अर्थ
वारमाह। ॐ तत्सदिति। सोदित्रा। परस्य ब्रह्मणो येतानि नामानि। ॐ तं
जगद्यत्र स्वयं च पूर्णोवेदोक्तरूपोनुपचारतेश्च। सर्वैः शुभैश्चाभियुतो
नचान्यैरोंतत्सदितिसेनमतो वदंतनीति हि ऋग्वेदखिलेषु। द्वितीयपादस्त ६
दर्थः। सदेव सौम्येदमग्रआसीदिति चोॐमिति ब्रह्मेति च। तेन ब्र
ह्मणा आत्मप्रजार्थं। वेदविधिप्रजननमात्र तापुरस्तात्॥ तत्फलमेस्या
दिति। प्रजननमिसौसद्भाव शब्देन प्रजननेसूचितं। ॐमित्यनुत्का अ
नभिसंधाय फलं यज्ञदानतपआदिक्रता मतिप्रीतेर्नामसाम्यात्। ब्रह्म॥ श्रीराम॥
ध्याय २ ११६८५

नेति।विधिरुत्सृष्टोहितैः।यद्वैवेदंनपठेत्तेनचार्थवेदोऽस्मात्त्वंविद्धियान्
नबुद्धीनितिचमाधवाचार्यस्मृतिः।अन्यथातामसाइत्येवोच्येतनतुविभ
ज्य।यदिसात्त्विकास्तर्हिनोत्सृष्टशास्त्राः।नहिवेदविरुद्धोधर्मः।वेदोऽखि
लोधर्ममूलंस्मृतिशीलेचतद्विदामितिस्मृतेः।वेदप्रणिहितोधर्मोह्य
ग धर्मस्तद्विपर्ययइतिचश्रूयते।अतोविभज्याह।त्रिविधेत्यादिना।स
त्त्वानुरूपानुचित्तानुरूपा।योयच्छ्रद्धःसएवसः।सात्त्विकश्रेष्ठःसात्त्विकइ
त्यादिविभज्याह।यजन्तेइत्यादिना।भगवत्कर्शनंअल्पत्वहृदिरेवायो
वैमुख्यांसंपरमंपुमांसंनैवंदृष्टाकर्शकःसोऽतिपापीतिह्यानमिम्लानश्रु
तिः।आसुरोनिश्चयोयेषांतेऽप्यासुरनिश्चयाः।देवास्तुसात्त्विकाःप्रोक्ताः
देसाराजसतामसाःइत्याग्निवेश्यश्रुतिः।प्रीतिरान्तरिका।हृद्यत्वं
दर्शनेस्थिराश्चनचदैवंपक्वाभवन्ति।तथाह्याज्यादयःसोम्यत्वमर्को

त ९४ सात्त्विकश्रेष्ठःसात्त्विकइत्यादि।

चाह। निश्चयमित्यादिना। यज्ञभेद उक्तो द्रव्ययज्ञा इत्यादिना। दानेत्व
भयदानं मतमर्चयति। एतेषां मध्ये यत्किंचिद्यज्ञादिकं कर्तव्यमेवे
त्यर्थः। अन्यथा ब्रह्मचारी गृहस्थो वानप्रस्थो यतिस्तथा। यदी
च्छेन्मोक्षमास्थातुमुत्तमाश्रममाश्रयेदित्यादिव्यासस्मृत्यादिवि
रोधः। ज्ञानयज्ञविद्याऽभयदानब्रह्मचर्यादितपसो हिते। अतोयं
द्वयोन्यथाप्रतीयते। अधिकारभेदेन लघोज्यं। अन्यथेतरे
षां गत्यभावात्। अन्यस्त्यागार्थो न तु युक्त इत्याह। नहीति। त्याग
स्तोति। अनिष्टमिति। पुनः संन्यासं प्रपंचयितुं कर्माण्याह। पं
चेत्यादिना। सांख्यकृतांते ज्ञानसिद्धांते। अधिष्ठानं देहादि
कर्ता विष्णुः। स हि सर्वकर्तेत्युक्तं। जीवस्य चाकर्तृत्वे प्रमाण
मुक्तं। करणमिंद्रियादि चेष्टाः। क्रियाः हस्तादिक्रियाभिर्हि हो ॥श्रीराम॥

ह्येव निष्पादितं भवतीत्याशयः। तथा च ऋग्वेद खिलेषु। ॐ यज्ञाद्य
निष्फलं कर्म तत्स्याद् । सद्वेतदर्थं कर्म वदंति देवाः। तद्देवानां स
न्निधेर्ब्रह्मप्रीतौ तेस्तु द्रूपलाज्जनितं ब्रह्मतत्स्यादिति॥ ॥श्रीमद्गी
ताभाष्ये सप्तदशोध्यायः॥ ॥श्रीबादरायणाय नमः॥ पूर्वोक्तं
साधनं सर्वं संक्षिप्योपसंहरत्यनेनाध्यायेन। फलनिश्चयो ऽके
रणेन वा। काम्यकर्मन्यासः संन्यासः। त्यागस्तु फलत्याग एव वा। त
था हि प्राचीनशालश्रुतिः। अनिच्छया कर्मणा वापि काम्यन्यासो
न्यासः। फलत्यागस्तु त्याग इति मनीषिण इति विशेषणात्। पूर्व
पक्षोपि ग्राह्य एव। फलत्यागेन त्यागो विवक्षितो यज्ञादेस्तु सक्षे
। यस्तु कर्मफलत्यागीत्यभिधास्यति। अत एक एवायं पक्षस्तत्सकारं

णसंग्रहः॥ अकर्तृत्वेपिविधिद्वारेमीश्वरप्रसादादिघोसत्योक्तकार
णैः कर्मद्वारापुरुषार्थाभिवृत्तीति। ईश्वराधीनत्वेपि विधिवशएव
नियतस्तेनेन। यदिचेद्धादिजायते तर्हि कारितमीश्वरेण फलं
च नियतं। वस्तुतो कर्तृत्वेपि अभिमानिकं कर्तृत्वं तस्यैव स्वातंत्र्यं
च जउम पेक्ष्यतिनप्रवृत्तविधिनैरर्थक्यं सर्वं चेत तदनुभवोक्तप्रमाण
सिद्धमिति न एषक प्रमाणमुच्यते। पुनः सोधानप्रथनायगुणभेदः
नाह। ज्ञानमित्यादिना। गुणसंख्याने गुणगणनप्रकरणे। एकं भाव
विदृष्टुं। परकृतदोषं दीर्घकाले कृतमप्यनुचिंतयः सूचयति सदी
र्घसत्री। परेण यः कृतो दोषः दीर्घकालकृतोपि वा। पेत्तस्य सूच
को दोषादीर्घसत्रीस उच्यते। इत्यभिधानात्। यथार्थत्वनियमाभा
वोराजस्यः। अन्यथा तामस्यामेदाभावात्। नैष्कर्म्यसिद्धिं नैष्कर्म्य

मादिकर्माणि जायंते। ध्यानादेरपि मानसी चेष्टा कारणं। सर्वत
नी चेष्टापि संस्कारकारणत्वेन भवति। दैवमदृष्टं। तथा चोया
स्यश्रुतिः। दैवो ब्रह्माद्येंद्रियाद्याः क्रियाश्च तथादृष्टं पंचमं कर्म
हेत्विति। केवलं निष्क्रियं। एतं केवलमात्मानं निष्क्रियत्वाद्दृदति
हीति। तत्रैव तद्ज्ञानं स्तौति। यस्येति। यस्त्वी षद्बध्यते स ईषदह
त्वं कारी च। एवं तर्हि न पुरुषमपेक्ष्य विधिः। अकर्तृत्वादित्य
त आह। ज्ञानमिति। त्रिविधा कर्मचोदना। एतत्त्रिविधमपेक्ष्य
कर्मविधिरिति त्रिविधमुच्यते। कारणानि संक्षिप्याह। कार
णमिति। कर्मसंग्रहः। कर्मकारणसंक्षेपः। अधिष्ठानादिकरण
एवांतर्भूतं। तथा ह्यृग्वेदखिलेषु। ज्ञानं ज्ञेयं तत्तानि नत्वापेक्ष्य वि
धिरूपितः। करणं चैव कर्ता च कर्मकार

गीताभाष्य
॥७१॥

संपूर्ण

नोपाये

फलं योगसिद्धिं। यथा येन सिद्धिं प्राप्तो ब्रह्माप्नोति तथा निबोधय। यासि
द्धिर्ज्ञाननिष्ठा परा निष्ठा ब्रह्मभूयाय कल्पते। ब्रह्मणि प्राप्तो ब्रह्मभूयं। ब्र
ह्मणि स्थितिः। स चैतदात्मना न स्कन्दतेऽर्थः। पुनरंतरंगसाधनान्युक्त्वोप
संहरति। सर्वकर्माण्यपीत्यादिना। परोक्षवचनं तु द्रोणं प्रति भीमवचनेवत्
धर्मत्यागः। फलत्यागः। कथमन्यथा युध्यस्वेति। कर्मफलत्यागी स
त्यागीत्यभिधीयत इति चोक्तं॥ पूर्णाशेषमहाविष्णोर्गीतामाश्रित्य ले
शतः। निरूपणं कृतं तेन प्रीयतां मे सदा विभुः॥ ९१॥ ॥इति श्रीमदानं
दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये अष्टादशोऽध्या
यः॥ ॥गुर्वंतर्गतभारतीशप्राणांतर्गतश्रीमद्बादरायणकृष्णायन
मस्ति

श्रीराम॥
॥७१५

1/5

॥श्रीमदानंदतीर्थभगवत्पादाचा॥
॥र्यनिर्मितंगीताभाष्यंसमाप्तं॥ ५

2061